(श्री) योगेश्वर of शामदत्त

- Ed. by शंकर दाजी शास्त्री - A unique treatise on आयुर्वेद written in 1483 Vikram era. Very brittle condition so the total pages are tissued. (Āyurveda Sangrahāvali - 2)

Published by पं. कृष्णशास्त्री at शनि सागर प्रेस, Mumbai, 1898 (1954 Vikram era).

45

[illegible]

Bill No. 3/07-08

181

2008-0347

1300

श्रीशङ्करः ।

आयुर्वेदसंग्रहावलिः । द्वितीयं पुस्तकम् ।

# श्रीयोगेश्वरः ।

आनरेबल्-डाक्टर-(एल्. एम्.)-इत्युपाधिभूषमाण-
स्य कृष्णशास्त्रीभाटवडेकरसूनोः भालचंद्रस्य
उचितसाहाय्येन, आयुर्वेदविद्यालयीन-
वाग्भट-प्रमुखाध्यापकेन दाजी-
शास्त्रीपदेसूनुना शंकरशा-
स्त्रिणा चिकित्सकेन
संपादितोयं
संग्रहः ।

स च

पं०-श्रीधरशिवलालसूनुना किसन (कृष्ण)-
लालेन स्वकीये 'ज्ञानसागराख्ययंत्रे'
मुद्रितः ।

1300

संवत् १९५४-सन १८९८

सर्वेविकाराः स्वायत्तीकृता मुद्रालयाधिपतिना ।

मूल्यं आनकषट्कम् ।

Centre for the Arts

# अर्पणपत्रिका ।

भो श्रीमद्गोस्वामीकुलावतंस विद्वत्कुल-
सौहार्दभूषण, विद्याचारादि-भारतभू-
मि-भूषणैकगुणमंडित, श्रीमद्दे-
वकीनंदनाचार्य,

( खलु प्रत्यक्षप्रियदर्शन ! )

Indira Gandhi National Centre for the Arts

मया किंचिन्मात्रेण सम्पादितमिदं
पुस्तकं, भवत्सकाशे प्रेमादर-
विनयपुरःसरमर्प्यते

भवतां

कृपाछत्रानुभवसेवी परमविनीत-शिष्यो-
पशिष्यान्तर्गतः शंकरदाजीशास्त्रीपदे

सम्पादकः ।

रक्तनिसृति० ।
नाडीपरीक्षा ।

DATA ENTERED
Date. 01/07/08

SANS
615.536
S49

Indira Gandhi National
Centre for the Arts

KALANIDHI
Rare Book Collection
ACC No.: R-347
IGNCA Date: 25-3-08

# श्रीयोगेश्वरग्रंथस्यानुक्रमणिका


| विषयाः । | पृष्ठाणि । |
| --- | --- |
| शारीरवर्णनम् । | १ |
| संधयः । | ६ |
| स्नायवः । | ६ |
| मांसपेशयः । | ६ |
| मर्म्माणि । | ७ |
| शिराः । | ७ |
| धमन्याः । | ७ |
| पुटपाकक्रिया । | ९ |
| क्वाथक्रिया । | ९ |
| फांटक्रिया । | ९ |
| हिमक्रिया । | ९ |
| कल्कक्रिया । | ९ |
| चूर्णक्रिया । | १० |
| गुटिकाक्रिया । | १० |
| लेहक्रिया । | १० |
| स्नेहक्रिया । | १० |
| लंघनक्रिया । | ११ |
| वमनक्रिया । | ११ |
| रेचनक्रिया । | ११ |
| नस्यक्रिया । | १२ |
| बस्तिक्रिया । | १२ |
| उत्तरवस्तिः । | १२ |
| धूमपानविधिः । | १३ |
| लेपक्रिया । | १३ |
| गंडूषक्रिया । | १३ |
| रक्तनिसृतिः । | १३ |
| नाडीपरीक्षा । | १४ |
| ऋतुचर्या । | १४ |
| तंद्रादिलिंगम् । | १६ |
| औषधग्रहणकालः । | १६ |
| प्रकृतयः । | १७ |
| औषधदैवतम् । | १७ |
| चिकित्स्याक्रमः । | १७ |
| सामज्वरचिकित्सा । | १७ |
| वातज्वरचि० । | १८ |
| अग्निकुमारः | १८ |
| पित्तज्वरः । | १९ |
| कफज्वरचिकित्सा | १९ |
| वातपित्तज्वर० | २० |
| वातकफज्वर० । | २० |
| पित्तकफज्वर० । | २० |
| विषमज्वरचि० । | २० |
| सन्निपातचि० । | २१ |
| आगंतुकचि० । | २९ |
| अतीसारचि० । | ३० |
| अमातीसारचि० । | ३१ |
| ग्रहणीचि० । | ३२ |
| प्रदरचि० । | ३२ |
| प्रमेहचि० । | ३३ |
| अर्शाचि० । | ३३ |
| क्रमिचि० । | ३५ |
| मूत्रकृच्छ्रचि० | ३५ |
| श्वासकास० । | ३६ |
| अग्निमांद्याजीर्ण० । | ३७ |


Indira Gandhi National Centre for the Arts

| विषयाः । | पृष्ठाणि । |
| --- | --- |
| पांडुचि० । | ३८ |
| शोकचि० । | ३९ |
| उदरचि० । | ३९ |
| गुल्मचिकित्सा । | ४० |
| अंत्रवृद्धिचि० । | ४१ |
| शूलचि० । | ४२ |
| हिक्काचि० । | ४२ |
| छर्दिचि० । | ४३ |
| तृष्णाचि० । | ४३ |
| कुष्ठचि० । | ४३ |
| दद्रुचि० । | ४५ |
| पामाचिकित्सा । | ४५ |
| सिध्मचि० । | ४६ |
| विस्फोटकचि० । | ४६ |
| भगंदरचि० । | ४६ |
| कंठमालाचि० । | ४७ |
| वातरक्तचि० । | ४७ |
| वातव्याधि० । | ४८ |
| रक्तपित्तचि० । | ४८ |
| भ्रमचिकित्सा । | ४९ |
| श्लीपदचि० । | ४९ |
| विसर्पचि० । | ४९ |
| शिरोरोग० । | ५० |
| नेत्ररोगचि० । | ५१ |
| पीनसचि० । | ५१ |
| कर्णरोगचि० । | ५२ |
| मुखरोगचि० । | ५२ |
| दंतरोगचि० | ५३ |
| केशरंजनम् । | ५३ |

| विषयाः । | पृष्ठाणि । |
| --- | --- |
| बालरोगचि० । | ५३ |
| ग्रहरोगचि० । | ५४ |
| विषरोगचि० । | ५५ |
| सुवर्णमारणम् । | ५५ |
| शल्यचिकित्सा । | ५६ |
| जरारसायनम् । | ५६ |
| गंधकादीनां शोधनम् । | ५८ |
| स्वर्णमाक्षिकशोधनम् । | ५९ |
| तारमाक्षिकशोधनम् । | ५९ |
| तुत्थशोधनम् । | ५९ |
| नीलांजनशोधनम् । | ५९ |
| मनःशिलाशुद्धिः । | ५९ |
| तालकशुद्धिः । | ५९ |
| रसकशुद्धिः । | ५९ |
| शिलाजतुशोधनम् । | ६० |
| दरदशुद्धिः । | ६० |
| क्षारकल्पना । | ६० |
| तक्रविधिः । | ६० |
| दंभप्रतीकारः । | ६१ |
| आसवारिष्टक्रिया । | ६३ |
| सुराक्रिया । | ६४ |
| सुक्तम् । | ६४ |
| चुक्रः । | ६४ |
| गुडसुक्तम् । | ६४ |
| सौवीरम् । | ६४ |
| कांजिककल्पना । | ६४ |
| सुक्तचुक्रम् । | ६४ |
| सुतम् । | ६४ |
| मधुसुक्तविधानम् । | ६५ |

# श्रीशंकरः ।

# श्रीयोगेश्वरः ।

॥ श्रीगणेशायनमः ॥ भक्तं नत्वैकदंतं शिवविधिसहितं लक्ष्मयुक्तं हरिं वै विघ्नध्वांतकरं चिकित्सकवरान् ध्यात्वा विधातृसुतान् । रोगग्रस्तशरीरसाधनपरं ग्रंथं च योगेश्वरं वक्ष्येहं खलु शामदंतविविधान् प्रेक्षामयघ्नान् गणान् ॥ १ ॥ कृष्णदत्तात्मजो वैद्यः पुरे सौजन्यसंज्ञके । अल्पबुध्यनुसारेण वक्ष्ये रोगहरं परम् ॥ २ ॥ यतो रोगसमुत्पत्तिः शरीरे जायते ततः । संक्षेपाद्वक्षते चादौ शरीरं शुक्ररक्तजं ॥ ३ ॥ पद्मिनी चित्रिणी चैव हस्तिनी शंखिनी तथा । नारी चतुर्विधा प्रोक्ता प्रत्येकं त्रिविधाः स्मृताः ॥ ४ ॥ सुरद्रंध्रा भवेदूर्ध्वं पंकजं द्वादशांगुलात् । यस्या ज्ञेयाश्विनी सा च वृषभी च नवांगुलात् ॥ ५ ॥ तथा सा शंखिनी ज्ञेया पंकजं च षडंगुलात् । एवं च विविधाः प्रोक्ताः पद्मिन्यादिषु नारिषु ॥ ६ ॥ द्वादशांगुललिंगेन ज्ञेयोश्वश्च नवांगुलात् । वृषभः शशकश्चैवं त्रिविधोनः षडंगुलात् ॥ ७ ॥ सामान्ये नरनारीणां गर्भाधानं च जायते । हीनाधिक्ये प्रजत्वं च कृशत्वं च परस्परात् ॥ ८ ॥ मुखमध्यगताहारो याति प्राणानिलेरितः । आमाशयं च तत्रस्थो माधुर्यं फेनतां व्रजेत् ॥ ९ ॥ ततः सो ग्रहणीं प्राप्य समानमरुतेरितः । कटुपाचकपित्तेन भवेद्विपाचितो रसः ॥ १० ॥ मूत्रत्वं तज्जलं बस्तौ तत्किट्टं मलसंज्ञितं । अधस्ताद्वलिमार्गेण यात्यप्यन्त्रेन नोदितं ॥ १२ ॥ हृदयं स रसो याति समानपवनेरितः । तत्र पाचकपित्तेन रंजितो रक्ततां व्रजेत् ॥ १३ ॥ तद्रक्तं धमनीं प्राप्य क्रमात् पित्तस्य तेजसा । मासेन शुक्रतां याति तथा स्त्रीणां रजो भवेत् ॥ १३ ॥ एवं भवति दोषाणां समत्वेन परस्परं । हीनाधिक्येन रोगांश्च भवंति देहनाशनः ॥ १४ ॥ वयसाद् द्वादशाद्वर्षादूर्ध्वं नारी रतिक्रमे । दृष्टरक्ता भवेद्योग्या विंशत्यब्द नरो भवेत् ॥ १५ ॥ दृष्टरक्तां विना कन्यां गच्छंति मूढचेतसः । ते यांति नरके घोरे जायासुखविवर्जिताः ॥ ॥ १६ ॥ कुमारौ सुरतासक्तिः कुर्वंतौ समयं विना । गच्छंतो देहधा-

तूनां हीनत्वं शिथिलां गतां ॥ १७ ॥ ऋतुप्राप्तां नरो नारीं त्रिरात्राच्च परं व्रजेत्। शुक्रशोणितसंयोगाद्गर्भोत्पत्तिः प्रजायते ॥ १८ ॥ ऋतुस्तु द्वादशाहानि पद्मे विकसिते भवेत्। स्त्रीषु संकोचतां याति कमलं तदनंतरं ॥ १९ ॥ शुक्राधिक्याद्भवेत्कुक्षौ दक्षिणे पुत्रसंभवः। वामपार्श्वे तु च रसः आधिक्याच्च वरानना ॥ २० ॥ मध्ये नपुंसकं ज्ञेयं समत्वाद्रक्तवीर्ययोः। युग्मं च वायुना भिन्नं क्रूरः स्वपनसंगमात् ॥ २१ ॥ शुद्धं भुक्त्वा हविष्यान्नं दृष्ट्वा शुद्धि दिनस्य च। सुस्नातां स्नेहास्निग्धानां पुत्रार्थं रमणीं व्रजेत् ॥ २२ ॥ यादृक्वर्णं रसान्नं च रमणी सेवते च या। तादृक्वर्णो भवेद्गर्भस्ततः शुद्धिं समाचरेत् ॥ २३ ॥ आहारेण विहारेण समो गर्भः प्रजायते। ततः शास्त्रोक्तविधिना प्राचरेत् प्राप्तदौहृदा ॥ २४ ॥ गर्भाशयगतं शुक्रं रक्तं चोभयसंगमात्। कललं प्रथमे मासि जायते चेश्वरेच्छया ॥ २५ ॥ शीतोष्णानिलै द्वितीये संघातो घन जायते। पाचितानां च भूतानां यदा पिंडः पुमान् भवेत् ॥ २६ ॥ चतुरस्रा च पेशी स्यात् जायते कन्यका तदा। शाल्मलीमुकुलाकारमर्वुदं च नपुंसके ॥ २७ ॥ शिरश्चरणहस्तानां तृतीये पंचपिंडकाः। अंगप्रत्यंगभागाश्च मासे सूक्ष्मा भवंति हि ॥ २८ ॥ सर्वेषामंगरूपाणां प्रत्यंगानां प्रव्यक्तता। चतुर्थे लब्धगर्भा स्त्री लब्धद्विहृदया भवेत ॥२९॥ लब्धगर्भा च या नारी यं यं भोक्तुं रसेषु च। इच्छेत्तस्यै प्रदातव्यं तं तं गर्भस्य सिद्धये ॥ ३० ॥ शुद्धान्नपानवासांसि शुद्धस्थलनिवासिनी। भजेदंतर्वती नारी त्यजेत् क्लेदकरं च यत् ॥ ३१ ॥ पंचमे च मनोज्ञानं प्रतिबुद्धितरं भवेत्। षष्ठे मासि च बुद्धेश्च सम्यक् ज्ञानं च जायते ॥ ३२॥ अंगानां चैव सर्वेषां प्रत्यंगानां च सप्तमे। सम्यक् स्पष्टतरो भागो गर्भे भवति निश्चितं ॥ ३३ ॥ भवत्योजोऽष्टमे मासि स्थिरं बुद्धिबलेंद्रियं। नवमो दशमश्चैवैकादशद्वादशौ तथा ॥ ३४ ॥ एतेषु चैव मासेषु गर्भप्रसव जायते। अतऊर्ध्वं विकारी स्यात् जननीनां च दुःखकृत् ॥ ३५ ॥ कृष्णौ स्तनमुखौ छर्दिर्योनिसंकोच एव च। स्फुरणं च तथा योनौ रोमराज्युद्गमस्तथा ॥ ३६ ॥ स्तनौ च कठिनौ चास्ये पीततं नेत्रमीलनं। चिन्हान्येतानि जायंते गर्भिण्या गर्भसंभवे ॥ ३७ ॥ दक्षिणे च स्तने पूर्वं पयसो दर्शनं भवेत्।

दक्षिणाक्षि महत्वं च दक्षिणोदर उन्नता ॥ ३८ ॥ पुन्नामध्येय-द्रव्येषु उत्कटेच्छा भवेत् ध्रुवं । कुमारं सूयते सा च कन्यां विपरिते भवेत् ॥३९॥ उदरं चोभयं यस्याः प्रोन्नतं च पुरःसरं । स्तनादीनां समत्वेन सूयते सा नपुंसकं ॥ ४० ॥ उन्नता च समं तस्या नाभौ गतश्च वोदरे । कथनीयं युग्मचिन्हं पणेनैव भिषग्वरैः ॥ ४१ ॥ ऋतुप्राप्ते तु या नारि स्वप्ने मैथुनमाचरेत् । गर्भाशये तु तद्रक्तं वायुना नीयते कदा ॥ ४२ ॥ कललं जायते तस्या मासे मासे च गर्भवत् । वर्द्धतो मूढगर्भो हि पुरुषाकारवर्जितः ॥ ४३ ॥ नखदंतशिरास्नायुधमनी-लोमरेतसः । श्मश्रुकेशाश्च जायंते स्थिराण्येतानि पितृतः॥४४॥मांस-शोणितमेदाश्च नाभिमज्जांतहृद्गुदाः । यकृत्प्लीहावस्थिराणि भवंत्ये-तानि मातृतः ॥४५॥ बलवर्णश्च हानिश्च स्थितिरूपचयं तथा । सर्वा-ण्येतानि जायंते रसेभ्यः सर्वजंतुषु ॥ ४६ ॥ इंद्रियाणि सुखं ज्ञानं विज्ञानं दुःखमेव च । आयुरेतानि जायंते चात्मनः प्राणसंभवे ॥४७॥ शिरो ग्रीवा च पाणी च पादौ पार्श्वोदराणि च । पृष्ठोरस्याष्टावंगानि प्रत्यंगानि च कथ्यते ॥ ४८ ॥ चिबुकनासोष्ठश्रवणांगुल्यो गुल्फौ च पार्ष्णयः ॥ अंगुष्ठौ च तथैतानि पार्थिवानि सदैव हि ॥ ४९ ॥ पंच-मासात्परं दक्षो न गच्छेत्प्राप्तदौहृदां । संगात्तस्याभवेद्धानिर्बालो शि-थिलमस्तकः ॥५०॥ भ्राजनं पाचनं क्लेदः संहतिश्च विवर्द्धनं । वायुतेजो-वकाशेभ्यो गर्भे च संभवंति हि ॥ ५१ ॥ अग्निसोमौ च वायुश्च सत्वं रजस्तमस्तथा । बुद्धींद्रियाणि भूतात्मा इति प्राण उदाहृतः ॥ ५२ ॥ इति शामदत्तविरचिते योगेश्वरे शारीरे गर्भोत्पत्तिर्नाम प्रथमः परिच्छेदः ॥ १ ॥

तत्र तस्मिन् शरीरे तु संक्षेपाद्वक्ष्यते मया । त्वचः सप्तकलाः सप्त-धातवः सप्तत्मलाः ॥ १ ॥ सप्तोपधातवो दोषास्त्रयस्त्वेकं च हृन्मतं । पंचगुल्मास्तथांत्राणि कंडराश्चैव षोडश ॥ २ ॥ नराणामाशयाः सप्त स्त्रीणां त्रयोधिका मताः । नव श्रोतांसि संधीनां दशाधिकशतद्वयं॥३॥ त्रिशतं च तथास्थीनां स्नायूनां च शतं नव । मांसपेश्या शतं पंच शिरा सप्तशतं तथा ॥ ४ ॥ सप्तोत्तरं मर्म्मशतं धमन्यश्चतुर्विंशतिः । एतत्संक्षेपतः प्रोक्तं विस्तरेणाधुनोच्यते ॥ ५ ॥ शुद्धमांसभवः स्नेहो वसा संकीर्त्यते च सा । पूर्वावभासिनी पद्मसिध्माकंठकजन्मभूः ॥६॥

द्वितीया लोहिता नाम्ना तिलकालकव्यंगभूः। श्वेता तृतीया विज्ञेया स्थानं चर्मदलस्य हि ॥ ७ ॥ ताम्रा चतुर्थी विविधकिलासं कुष्ठजन्मभूः। पंचमी वेदनी नाम्ना विसर्पकुष्ठसर्वभूः ॥ ८ ॥ सृष्टी च लोहिता ग्रंथी श्लीपदार्बुदगंडभूः। स्थूला त्वक् सप्तमी नाम्ना विद्रध्यादेः स्थितिश्च सा ॥ ९ ॥ कला मांसधरा पूर्वा लोहिता द्वितीयोदिता। मेदोधरा तृतीया स्याच्चतुर्थी श्लेष्मसंस्थितिः ॥ १० ॥ पंचमा च तथा त्रीणि षष्ठी पित्तधरा मता। शुक्रधरा सप्तमी च कलाः सप्तेत्युदीरिताः ॥ ११ ॥ द्व्यंगुले दक्षिणे पार्श्वे बस्तिद्वारस्य चाप्यधः। मूत्रस्रोतःपथात् शुक्रं पुरुषस्य प्रवर्तते ॥ १२ ॥ रसाच्च जायते रक्तं रक्तजं मांसमेव च। मांसोद्भवश्च मेदः स्यान्मेदजान्यस्थिनी विदुः ॥१३॥ अस्थिभ्यो जायते मज्जा मज्जाया शुक्रमेव च। धातवोन्योन्यतः सर्वे जायंते पित्ततेजसा ॥ १४ ॥ जिव्हानेत्रकपोलानां जलं पित्तं च रंजकं। कर्णविट् रसनादंतकक्षामेढ्र्यादिजं मलं ॥ १५ ॥ नखनेत्रमलं वक्त्रे स्निग्धत्वं पिटिका तथा। जायंते सप्तधातूनां मलान्योन्यमनुक्रमात् ॥ १६ ॥ शुक्रान्मूत्रं वसा स्वेदो दंताः केशास्तथैव च। मला धातुभवा ज्ञेया एते सप्तोपधातवः ॥ १७ ॥ वायुः पित्तं कफो दोषाः प्रत्येकं पंचधा स्मृतम्। समाः सुखाय विज्ञेया रोगदा विषमाः स्मृताः ॥ १८ ॥ पंगवो मलधातुपधातुपित्तकफादयः। नीयंते वायुना यत्र गच्छंति तत्र मेघवत् ॥ १९ ॥ विभागकरणार्त्तेषु पवनो बलवान् मतः। शीतः सूक्ष्मश्चलोरूक्षो रजोगुणमयो लघुः ॥ २० ॥ मलाशये च रक्तोष्ठे वन्हिस्थाने तथा हृदि। कंठे सर्वांगदेहेषु वायुः पंचविधः स्मृतः ॥ २१ ॥ अपानः स्यात् समानश्च प्राणोदानौ तथैव च। व्यानश्चेति समीरस्य नामान्युक्तान्यनुक्रमात् ॥ २२ ॥ पित्तं नीलद्रवं पित्तमुष्णं सत्वगुणोत्तरं। आम्लतां च व्रजेद् दग्धां कटुतिक्तं रसं मतं ॥ २३ ॥ आहारपाचकं पित्तमग्निरूपं तिलोन्मितं ॥ अग्न्याशये त्वचि ज्ञेयं लेपाभ्यंगादिपाचनं ॥ २४ ॥ ज्ञेयं कांतिकरं नाम यत्पित्तं यकृतस्थितं। तत्पित्तं रंजकं नाम रसं च शोणितं नयेत् ॥ २५ ॥ नेत्रयो स्तिष्टितं यच्च रूपदर्शनकारि तत्। हृदये तिष्ठते पित्तं प्रज्ञामेधाकरं च तत् ॥ २६ ॥ पाचकं भ्राजकं चैव रंजकालोचके तथा। साधकं चेति पंचैव पित्तनामान्यनुक्रमात् ॥ २७ ॥ कफस्त्वामा-

शये मूर्ध्नि कंठे हृदि च संधिषु । तिष्ठन् करोति देहस्य स्थैर्यं सर्वांगपाटवं ॥ २८ ॥ क्लेदनः स्नेहनश्चैव रसकश्चावलंबनः । श्लेष्मिकश्चेति नामानि कफस्योक्तान्यनुक्रमात् ॥ २९ ॥ अंतर्वत्न्याश्च गर्भेण स्रोतसां रक्तवाहिनां । नार्य्यार्तवं निरुद्धंते तेनार्तवं न दृश्यते ॥ ३० ॥ ऊर्ध्वं गतेन रक्तेन प्लीहो वामे च दक्षिणे । यकृद्गर्भस्य जायंते द्वौ गुल्मौ रक्तसंभवौ ॥ ३१ ॥ तद्रक्तं च स्तनौ याति शेषं स्थूलो स्तनौ मतौ । तेन च तद्भवं ज्ञेयं स्तन्यं बालस्य पोषणे ॥ ॥ ३२ ॥ तद्रक्तफेनसंभूतौ वामे गुल्मपुफुर्मतः ॥ रक्तमेदप्रसादाच्च वृक्षौ च कुक्षिगोलकौ ॥ ३३ ॥ रक्तश्लेष्मप्रसादेन गुदबस्ति अंत्राणि वै ॥ जिव्हा कफरक्तमांसानां सारेण जायते तथा ॥३४ ॥ कफासृग्मेदमांसानां सारेण वृषणौ मतौ । वीर्यवाहिशिराधारौ ज्ञेयौ च पुरुषावहौ ॥ ३५ ॥ कफरक्तप्रसादेन हृदयं चेतनाश्रयं । पंकजेन समं तद् हृत् निद्राकाले निमीलति ॥ ३६ ॥ विकाशं जागृतिं याति प्राणाश्रयमधोमुखं । निद्रा तु वैष्णवी माया तिष्ठत्येव स्वभावतः ॥३७ ॥ अग्न्याशयो भवेदूर्ध्वं नाभिश्च वामपार्श्वतः । तदुपरि तिलं ज्ञेयं तृष्णाच्छादनकं मतं ॥ ३८ ॥ श्लेष्माशयं स्यादुरसि तस्मादामाशयस्त्वधः । ऊर्ध्वमग्न्याशयो नाभेर्वामभागव्यवस्थितः ॥ ३९ ॥ तस्योपरि तिलं ज्ञेयं तदधः पवनाशयः । मलाशयस्त्वधस्तस्य बस्तौ मूत्राशयः स्मृतः ॥ ४० ॥ नीव रक्ताशयमुरो ज्ञेया सप्ताशयास्त्वमी । पुरुषेभ्योधिकाश्चान्ये नारीणामाशयस्त्रयः ॥ ४१ ॥ मलमूत्राशयोर्मध्ये चोर्ध्वं गर्भाशयः स्मृतः । हृदयस्योभये पार्श्वे स्तनौ स्तन्याशयौ मतौ ॥ ४२ ॥ नासानयनकर्णानां द्वे द्वे रंध्रे प्रकीर्त्तिते ॥ मेहनापानवक्त्राणामेकैकं छिद्रमुच्यते ॥ ४३ ॥ नवस्रोतांसि दशमं त्वलक्षं तालुनी नृणां । स्त्रीणां त्रीण्याधिकानि स्युः स्तनयो गर्भवत् मतः ॥ ४४ ॥ कंडराः पादयोर्द्वे द्वे हस्तयोश्च तथा मते । ग्रीवा हृदयसंधाने चतस्रो मुनिभिः स्मृताः ॥ ४५ ॥ श्रोण्याःपृष्ठस्य संधाने चतस्रः सहसंगताः । प्रसारणाकुंचनयोरंगानां कंडरा मताः ॥ ४६ ॥ त्रीणि त्रीणि च प्रत्येकमंगुलीषु च पंच च । तले त्वेकं तत् प्रधानं द्वे द्वे च गुल्मकूर्मयोः ॥ ४७ ॥ एकं पार्ष्णौ च जंघायामेकं द्वे जानुनी तथा । उरौत्वेकं च पादस्य त्रिंशदस्थीनि विन्यसेत् ॥४८ ॥ एवंस्याद्द्वितीये पादे करयोः

षष्ठिरस्थिनि । भगं गुदे त्रिकेष्वेकमेकं द्वे च नितंबयोः ॥ ४९ ॥ पृष्ठे त्रिंशदुरस्यष्टौ द्विसप्ततिश्च पार्श्वयोः । द्वेऽक्षके नव ग्रीवायां चत्वारः कंठनाडिषु ॥५०॥ हनौ द्वे त्रिंशद्दंतानां नासायां त्रीणि तालुनि। एकं गंडकर्णशंखेष्वेकैकं शिरसि च षट् ॥ ५१ ॥ एवं प्रोक्तानि चास्थीनां त्रिशतानि भिषग्वरैः। आधारश्च तथा सारः कायेस्थीनि बुधा जगुः ५२

## अथ संधयः ।

अंगुष्ठद्वौ त्रयः प्रोक्ताः पादस्यांगुलिषु पृथक् । जानुवंक्षणगुल्फेषु त्वेकैको द्वितीये तथा ॥ ५३ ॥ हस्तयोश्च चतुस्त्रिंशदेतेष्टषष्ठि संधयः । अष्टौ ग्रीवाप्रदेशे तु त्रयो कंठस्य नाडिषु ॥ ५४ ॥ द्वात्रिंशद्दंतमूलेषु हृदयक्लोमनाडिषु । अष्टादशैको नासायामेकः काकलके मतः ॥ ५५ ॥ नेत्रगंडकर्णशंखेषु द्वे द्वे च संधिसंमतौ । हनुभ्रूशंखमूलेषु द्वौ द्वौ त्वेकश्च मूर्ध्नि च ॥ ५६ ॥ पंच शिरःकपालेषु संधयंति च संधयः । दशाधिकं च द्विशतमेव प्रोक्तं च संधिनां ॥ ५७ ॥

## अथ स्नायवः ।

Indira Gandhi National Centre for the Arts

अंगुलीषु पृथक् षट् षट् तले कूर्चे दशं दश । गुल्फे दश च जंघायां त्रिंशद्दश च जानुनि ॥ ५८ ॥ चत्वारिंशदुरसि च वंक्षणे दश स्नायवः । पादेप्येवं द्वितीये च हस्तयोरिति षट्शतं ॥ ५९ ॥ षष्ठि कट्यामशीतिश्च पृष्ठे षष्ठिश्च पार्श्वयोः । त्रिंशत् उरसि ग्रीवायां षट्त्रिंशत्स्नायवो मताः ॥ ६० ॥ मूर्ध्नि चैव चतुस्त्रिंशद्देवं नवशतं मतं । स्नायूनां बंधनं देहे मांसास्थिमेदसां परं ॥ ६१ ॥

## अथ मांसपेशयः ।

तिस्रस्तिस्रश्च पादस्य चांगुलीषु पृथक् दश । पादस्योपरि कूर्चे च दशपंच तले तथा॥ ६२ ॥ पंच गुल्फे विंशतिश्च गुल्फजान्वंतरे तथा। पंच जानुनि विंशत्यौ रुरौ दश च वंक्षणे ॥ ६३ ॥ एवं पादे शतं प्रोक्ता द्वितिर्पादस्तथाविधाः । एवं च हस्तयोः प्रोक्ता एका वृषणमेढ्रयोः ॥६४॥ दश स्फिजोर्वस्तिशिरे द्वेपंच तूदरे मताः । एका नाभौ दश पृष्ठे पार्श्वयोः षट्दश वक्षसि ॥६५ ॥ सप्ताक्षकांसौ हृद् द्वे च यकृत्प्लीहागुदेषु षट् । आमाशये चतस्रश्च ग्रीवायां चतस्रो

मताः ॥ ६६ ॥ हन्वोरष्टौ कंठ एका त्वेका काकलके मता । द्वे तालु-नि च जिव्हायामेका द्वे चोष्टयोर्मते ॥ ६७ ॥ नासायां द्वे चतस्रश्च गंडयोर्नेत्रयोश्च द्वे । द्वे कर्णयोर्ललाटे तु चतस्रो मूर्ध्नि चैकता॥ ६८ ॥ एवं तु मांसपेशीनामुक्तं पंचशतं बुधैः । स्त्रीणां च विंशत्यधिका स्तन-योर्गर्भवर्त्मनि ॥ ६९ ॥

## अथ मर्म्माणि ।

शतं सप्तोत्तरं तेषां मर्माणि संभवंति हि।एकादशैव मांसानां स्नायू-नां सप्तविंशतिः ॥ ७० ॥ अष्टौ मर्म्माणि चास्थीनां संधीनां विंशति-स्तथा । चत्वारिंशच्च शिराणमेकाधिकं तथा भवेत् ॥ ७१ ॥ पादहस्तेषु प्रत्येकमेकादशत्वेकादश । रक्ता(?)त्युरस्युदरयो द्वादश पृष्ठग्रीवयोः ॥ ७२ ॥ चतुर्दशसप्तत्रिंशत् प्रत्यूर्ध्वं सप्तसंयुतं । मर्म्माणि च शतं प्रोक्तं जीवाधारं परं मतं ॥ ७३ ॥

## अथ शिराः ।

नाभिमूलप्रसूताभ्यो धमनीभ्यः समुद्भवः । शिरा सप्तशतं तासां चत्वारिंशच्च मूलजा ॥ ७४ ॥ वातपित्तश्लेष्मरक्तस्थानेषु च पृथक् पृथ-क् । तथा शिरा दश प्रोक्तास्तासां सप्तशतं मतं ॥७५॥ वातस्थानगता-नां च दशानां वातसंवहं । पंचसप्ततिशतं तु तत्रैव च भिषग्वरैः ॥ ७६ ॥ एवं पित्ताशये ज्ञेयं तथैव च कफाशये । एवं रक्ताशये प्रोक्तं शिरा सप्तशतं मतं ॥ ७७ ॥ वातवाहीशिरामध्ये पृथक् च पंचविंश-तिः । पृथक् च हस्तपादेषु शतं चैवं शिरा मताः ॥ ७८ ॥ अष्टौ श्रोण्यां पार्श्वयोश्च चतस्रः षट् तु पृष्ठगे । षट् चोदरे वक्षसि च दश-ग्रीवा चतुर्दश ॥ ७९ ॥ चतस्रः कर्णयोर्नव जिव्हायामष्ट नेत्रयोः । षट् नासिकायामित्येवं प्रोक्ता वातवहाः शिराः ॥ ८० ॥ पित्तश्ले-ष्मवहानां च विशेष उच्यते मया । रक्तवहानां नेत्रयोर्दश द्वे क-र्णयोर्मताः ॥ ८१ ॥ एवं सप्तशतं प्रोक्तं वातपित्तकफादिनां । शि-राणां वाहिनीनां च देहे वृद्धिकरं परं ॥ ८२ ॥

## अथ धमन्याः ।

नाभौ कूर्मो शिरामूलं भवेत्तस्य च दक्षिणे । पुच्छं वामे मुखं पार्श्वे सव्युपादे करावधः ॥ ८३ ॥ ऊर्ध्ववामो हस्तपादौ कूर्मस्यैवंविधस्य

च । हस्तपादेषु प्रत्येकं पंच पंच शिरा मताः ॥ ८४ ॥ पुच्छे द्वे च मुखे द्वे च धमन्यो दश वाहिकाः । चतुर्विंशतिरित्येवं धमंति पवनं तनौ ॥ ८५ ॥ तासामूर्ध्वगता नाड्यो दश त्रेधा भवंति च । हृदयं प्राप्यते त्रिंशत् शब्दादीन् संवहंति च ॥ ८६ ॥ वातपित्तश्लेष्मरक्तरसांस्ताः संवहंति च । द्वे द्वे धमन्यौ च पृथगूर्ध्वं तां धारयंति च ॥ ८७ ॥ शब्दरूपगंधरसान् गृण्हंत्यष्टौ प्रवाहिकाः । भाषते द्वे च घोषेते द्वे द्वाभ्यां स्वपतिस्तथा ॥ ८८ ॥ द्वाभ्यां च बुध्यति द्वेऽश्रुवाहिनौ द्वे च वाहतः । स्त्रीस्तन्यं ते च नृशुक्रं त्रिंशदेवं मता बुधैः ॥ ८९ ॥ स्यात् दशाधो गता नाड्यो त्वामपक्वाशयांतरे । त्रिधा भवंति तास्त्रिंशदधः कुर्वंति संचयं ॥ ९० ॥ वातपित्तश्लेष्मरक्तरसान् द्वे द्वे वहंति च । तासां द्वे चान्नवाहिन्यौ द्वे च तोयवहे मते ॥ ९१ ॥ मूत्रं वै वहते द्वे च द्वे शुक्रस्योदयाय च । रक्तोदयायते एव द्वे शुक्रस्य विसर्गके ॥ ९२ ॥ ते स्त्रीरक्तविसर्गाय द्वे च वर्चः प्रवर्त्तके । अष्टौ तिर्य्यग्गतानां च मताः स्वेदस्य तर्पणे ॥ ९३ ॥ तिर्यग्गतांश्चतस्रश्च नेकधा संभवंति याः । ताभिः सूक्ष्मांकुरैः कृत्स्नं वपुर्व्याप्तं शरीरिणां ॥ ९४ ॥ तासां मुखानि बध्नानि रोमकूपे पयै रसं । संतर्पयंति याः स्वेदं संवहंति त्वहर्निशं ॥ ९५ ॥ धमन्यो रसवाहिन्यो धमंति पवनं तनौ । चतुर्विंशति संक्षिप्ता एवं नाभिसमुद्भवाः ॥ ९६ ॥ गर्भाधानकरं लिंगमयनं शुक्रमूत्रयोः ॥ प्राणं शरीरं यावत्तु संयोगादायुरुच्यते ॥ ९७ ॥ धातवस्तन्मलादोषा नाशयत्यसमास्ततुम् । समां सुखाय विज्ञेया बलस्योपचयाय च ॥ ९८ ॥ इति श्रीशामदत्तविरचिते योगेश्वरे शारीरे त्वचादिकथनं नाम द्वितीयपरिच्छेदः ॥ २ ॥

## अथ शिक्षा ।

स्वरसः पुटपाकश्च क्वाथः फांटो हिमस्तथा । कल्कचूर्णे च गुटिकावलेहः स्नेह एव च ॥ १ ॥ लंघनं वमनं रेचनस्ये बस्तिनिरूहणं । धूमपानं लेपविधिर्गंडूषो रक्तनिःसृतिः ॥ २ ॥ एतेषां च त्रिया मात्रा किंचिदत्रोच्यते मया । ज्ञात्वा वयोग्न्यायुबलं योजयेत् कुशलो भिषक् ॥ ३ ॥ "स्वरसक्रिया" । आर्द्रात् द्रव्यात् समुत्पन्नो रसः स्वरस उच्यते । पलार्द्धं घोरवातस्य व्याधिं ज्ञात्वा च योजयेत् ॥ ४ ॥

मधुक्षारगुडश्वेतालवणानि च जीरकं। तैलं घृतं च चूर्णादीन् स्वरसे कोलमाक्षिपेत्॥ ५॥

## अथ पुटपाकक्रिया।

तंदुलस्य पलं शुभ्रं क्षिपेदष्टगुणे जले। धावयित्वा जलं ग्राह्यं तंदुलोदककर्मणि॥ ६॥ द्रव्यमार्द्रं च शुष्कं वा पिष्ट्वा तंदुलवारिणा। पत्रैस्तद्गोलकं वेष्टय काश्मरीजंब्वम्रादिनां॥७॥ बध्वा सूत्रेण गोधूमपिष्टेन वेष्टय गोलकं। लिप्त्वांगुलं च पंकेन गोमयैर्वन्हिना दहेत्॥८॥ अंगारवर्णाभं दृष्ट्वातद्रसं पाययेत्पलं। क्षारादीन् स्वरसवच्च कर्षमात्रं मधु क्षिपेत्॥ ९॥

## अथ क्वाथक्रिया।

क्षिप्त्वा पयःषोडशगुणे क्षुण्णं द्रव्यपलं पचेत्। मृद्वग्निना मृण्मये च पेयमष्टावशेषितं॥ १०॥ वातपित्तकफातंके चतुर्थाष्टमषोडशः। अंशौ क्वाथे क्षिपेत् श्वेता विपरीतं मधुस्मृतं॥ ११॥ गुग्गुलं जीरकक्षारौ लवणानि शिलाजतु। हिंगु त्रिकटुकं चैव क्वाथे शाणोन्मितं क्षिपेत्॥ १२॥ क्षीरं गुडं घृतं तैलं मूत्र चान्यद्द्रवं तथा। कल्कचूर्णादिकं क्वाथे निक्षिपेत् कर्षसंमितं॥ १३॥

## अथ फांटक्रिया।

मृत्पात्रस्थे जले चोष्णे क्षुण्णं द्रव्यपलं क्षिपेत्। कुडवं स्रावयेत्पादात् स रसः फांट उच्यते॥ १४॥ द्विपलं च पिबेत्तस्य गुडादीन् क्वाथवत् क्षिपेत्॥

## अथ हिमक्रिया[1]।

भांडे नीरपलैः षड्भिः क्षुण्णं द्रव्यपलं क्षिपेत्। अहोरात्रस्थिता तस्मात् हिमस्तु फांटवत् पिबेत्॥ १५॥

## अथ कल्कक्रिया।

द्रव्यमार्द्रं शिलापिष्टं शुष्कं वासजलं भवेत्। प्रक्षेपावीपकल्कास्ते तन्मानं कर्षसम्मितं॥ १६॥ कल्के मधुघृतं तैलं देयं द्विगुणमात्रया। सितां गुडं समां दद्यात् द्रवं देयं चतुर्गुणं॥ १७॥

---

१. शीतकषाय इत्यपि अस्य द्वितीयं नाम वर्तते।

## अथ चूर्णक्रिया।

शुष्कं द्रव्यं सुपिष्टं यद्वस्त्रेण गालितं भवेत्। तच्चूर्णं तत्र कर्षे तु समो देयो गुडो बुधैः ॥ १८ ॥ शर्करा द्विगुणा हिंगु देयं वल्लं घृतादिभिः। द्विगुणैश्च लिहेत् चूर्णं द्रवैश्चतुर्गुणैः पिबेत् ॥ १९ ॥ द्रवेण यावता सम्यक् चूर्णं सर्वं प्लुतं भवेत्। भावनाया प्रमाणं तच्चूर्णे प्रोक्तं भिषग्वरैः ॥ २० ॥

## अथ गुटिकाक्रिया।

लेहवत्साधयेद्वन्हौ गुडो वा शर्करा तथा। गुग्गुलुर्वाक्षिपेत्तत्र चूर्णं तन्निर्मिता वटी ॥ २१ ॥ द्रव्येण मधुना वापि गुटिकां कारयेत् बुधः। चूर्णा चूर्णसमं कार्यो गुग्गुलुर्मधु तत्समं॥२२॥ द्रवं च द्विगुणं देयं मोदकेषु भिषग्वरैः। कर्षप्रमाणा तन्मात्रा बलं दृष्ट्वा प्रयुज्यते ॥ २३ ॥

## अथ लेहक्रिया।

पुनः पाकात् घनत्वं तत् क्वाथादीनां रसक्रिया। उक्ता स एव लेहश्च मात्रा तस्य पलोन्मिता ॥ २४ ॥ देया चतुर्गुणा श्वेता गुडश्च द्विगुणो मतः। चतुर्गुणं द्रवं दद्यादिति सर्वत्र निश्चयः ॥ २५ ॥ सुपक्के तंतुमत्वं स्यादवलेहो स्यु मंजनः। स्थिरत्वं पिडिते मुद्रा गंधवर्णौ समुद्भवः ॥ २६ ॥

## अथ स्नेहक्रिया।

द्रवात् पादं घृतं तैलं कल्कात्स्नेहश्चतुर्गुणः। साधयेदुषितादग्नौ तस्य मात्रा पलोन्मिता ॥ २७ ॥ नीरं चतुर्गुणं क्वाथे द्रव्यात् षोडशिकं घने। क्वाथयेत्पादशिष्टेस्मिन् स्नेहस्तु साधयेद्भिषक् ॥ २८ ॥ अंबुक्वाथरसैर्यत्र पृथक् स्नेहस्य साधनं। कल्कस्यांशं तत्र दद्यात् चतुर्थं षष्ठमष्टमं ॥ २९ ॥ दुग्धे दधिरसे तक्रे कल्को देयोष्टमांशिकः। स्नेहपाके कृते तस्मिन् तोयं चतुर्गुणं क्षिपेत् ॥ ३० ॥ द्रव्येण केवलेनैव पाके यंत्रेरिति क्वचित्। क्वाथ्यद्रव्यस्य कल्कोपि तत्र स्नेहो प्रमुच्यते ॥ ३१ ॥ वर्तिवत्स्नेहकल्कः स्यायदांगुल्या विवर्तितः। शब्दहीनोग्निनिक्षिप्तः स्नेहसिद्धो भवेत्तदा ॥ ३२ ॥ यदा फेनोद्गमस्तैले फेनशांतिश्च सर्पिषे। वर्णगंधरसोत्पत्तिः स्नेहसिद्धिस्तदा भवेत्॥ ३३ ॥

तस्यार्धं मृदुपाकाश्च मध्यमः सर्वकर्मसु । अभ्यंगार्थे खरः कल्कःपाकेन ज्ञायते क्रमात् ॥ ३४ ॥

## अथ लंघनक्रिया ।

नवज्वरे च कफजे छर्द्यामामातिसारिणि । रक्तपित्ते शिरोरोगे श्लेष्मजे मुखरोगिषु ॥ ३५ ॥ विषूचिकायां विस्फोटे कफजेष्वक्षिरोगिषु । एतेषु च प्रसूतानां क्षतानां प्रथमेऽहनि ॥ ३६ ॥ बालवृद्धकृशक्षीणसुकुमारातिसारिणः । पित्ताधिक्ये च गर्भिण्या लंघनं कारयेत् न तु ॥ ३७ ॥

## अथ वमनक्रिया ।

स्निग्धस्विन्नश्च भुक्त्वा च यवागूवमनं चरेत् । शरद्वसंतप्रावृट्सु बलवांश्च कफाधिकः ॥ ३८ ॥ विषस्तन्यगदे मेहे श्लीपदार्बुदकुष्ठिषु। मंदाग्न्यजीर्णकासेषु विसर्पभ्रमहृद्रदे ॥ ३९ ॥ विदारिकापचिश्वासेऽपस्मारे पीनसे ज्वरे । नासाताल्वोष्ठपाकेषु कर्णश्रावेऽधिजिव्हके ॥४०॥ रक्तातिसारउन्मादे शिरःशूले गलग्रहे । पित्तश्लेष्मगदे जीर्णभुंजि सवज्वरेरुचौ ॥ ४१ ॥ आमातिसारे वृध्यौ च मेदसो वमनं चरेत् । एतेष्वेव च रोगेषु दृष्ट्वा कालवयोबलं ॥ ४२ ॥ तिमिरी चोदरी वृद्धः कृशः स्थूलः क्षतातुरः । मदार्तो गर्भिणी रूक्षः क्षुधितश्च निरूहितः ॥ ४३ ॥ उदावर्त्यूर्ध्वरक्ती च दुःछर्दी केवलानिली । पांडुरोगिकृमिव्याप्तौ नैते वम्या भिषग्वरैः ॥ ४४ ॥

## अथ रेचनक्रिया ।

शरद्वसंते देहस्य शुध्यै रेचनमाचरेत् । स्निग्धः स्विन्नस्य वातस्य गौरवाद्यन्यथा भवेत् ॥ ४५ ॥ पित्ताध्मानोदरामेषु कोष्ठशुध्यौ विरेचयेत् ॥ बालवृद्धात्वतिस्निग्धक्षतक्षीणा भयान्विताः ॥ ४६ ॥ कामार्तो मार्गविश्रांतः कृशोतिसुकुमारकः ॥ क्षुधार्तस्तृषितः क्लिन्नः क्षयी स्थूलश्च गर्भिणी ॥ ४७ ॥ नवज्वरी प्रसूता च मंदाग्निश्च मदात्ययी । शल्यार्दितश्च रूक्षश्च न विरेच्या विजानता ॥४८॥ योनिरोगप्रमेहार्तो गुल्मप्लीहव्रणार्दिताः । विद्रधिच्छर्दिविस्फोटविषूचीकष्टसंयुताः॥ ४९ ॥ कर्णनासाशिरोवक्त्रगुदमेहामयान्विताः । पांडुशोथाक्षिरोगार्त्ताः कृमि-

क्षारानिलार्दिताः ॥ ५०॥ शूलिनो मूत्रघातार्ता विरेकार्हा नरा मताः ।
मृदुमध्यमक्रूरेषु विविच्य रेचयेद्भिषक् ॥ ५१ ॥

## अथ नस्यक्रिया ।

नासारंध्रेण यत् ग्राह्यं नस्यं तत् प्रोच्यते द्विधा । रेचनं स्नेहनं योज्यं षट्चतुरष्टबिंदुभिः ॥ ५२ ॥ नस्यं त्यजेद्भोजनांतेऽशीतिवर्षात्परं च प्राक् । अष्टवर्षाच्च गर्भिण्यां क्रोधशोकतृषार्त्तिषु ॥ ५३ ॥ स्नातो नवप्रतिश्यायी दंतबस्तिस्त्वजीर्णी च । वेगरोधी स्नातुकामो नैते नस्या भिषग्वरैः ॥ ५४ ॥ ऊर्ध्वजत्रुगते रोगे कफजे स्वरसंक्षये । अरोचके शिरः शूले शोफापस्मारकुक्षिषु ॥ ५५ ॥ पीनसे गलरोगे च सन्निपाते विषज्वरे । मनोविकारे निद्रायां नस्यं देयं कृमीषु च ॥५६॥

## अथ बस्तिक्रिया ।

बस्तिर्द्विधा तु वासाख्यो स्नेहेन निरुहस्तथा । कषायक्षीरतैलैश्च बलं दृष्ट्वाप्रयोजयेत् ॥५७॥ षड्भिः त्रिभिःपलः शुक्तिस्तृतीये केवलानिलैः । दिवा शीते वसंते च स्नेहबस्तिःप्रदीयते ॥ ५८ ॥ त्रिभिश्चतुर्भिः कुडवैः पंचभिश्च निरूहणं । ग्रीष्मवर्षाशरत्काले रात्रौ देयं भिषग्वरैः ॥ ॥ ५९ ॥ अतिस्निग्धो क्लिष्टदोषः क्षतोरस्को वृषस्तथा । आध्मानच्छर्दिहिक्कार्शःकासश्वासप्रपीडितः ॥ ६० ॥ गुदशोफातिसारार्तो विषूची कुष्टसंयुतः । गर्भिणी मधुमेही च न निरूह्या जलोदरी ॥ ६१ ॥ वातव्याधिउदावर्ते वातासृग्विषमज्वरे । मूर्च्छातृष्णोदरानाहमूत्रकृच्छ्राश्मरीषु च ॥ ६२ ॥ वृद्ध्यसृग्दरमंदाग्निप्रमेहेषु निरूहिणां ॥ शूलेऽम्लपित्ते हृद्रोगे नेत्रं कृत्वा प्रयुज्यते ॥ ६३ ॥ षडंगुलं षड्वर्षात्प्राक् द्वादशादष्टमंगुलं ॥ द्वादशांगुलमूर्ध्वमतो नेत्रं धातुजं भवेत् ॥ ॥ ६४ ॥ अंशे द्वे कर्णिके तस्य सम्यग्बध्नाय क्रीयते ॥ मूले कोलास्थिवच्छिद्रमग्रे च मुद्गवन्मतं ॥ ६५॥ अष्टांगुलं चर्मबस्ति द्रवेण पूरयेद्भिषक् । नेत्रे बध्वा गुदस्ते च मुखं रुध्वा प्रपीडयेत् ॥ ६६ ॥

## अथ उत्तरबस्तिः ।

द्वादशांगुलकं नेत्रं धातुजं मध्यकर्णिकं । मालतीपुष्पवृत्ताभं छिद्रे सर्षपनिर्गमं ॥ ६७ ॥ घृताभ्यक्तं शनैर्नेत्रं लिंगे योनौ तथार्पयेत् । तन्मध्ये प्रक्षिपेत् प्राज्ञ द्रवं सम्यक् क्रियोदितं ॥ ६८ ॥

## अथ धूमपानविधिः ।

धूमस्तुषड्विधः प्रोक्तः शमनो बृंहणस्तथा । रेचनः कासहा चैव वामनो व्रणधूपनः ॥ ६९ ॥ श्रांतो भीतोद्दत्तवस्तिर्विरक्तो दुःखिनस्तथा । निद्रादाहः सतृष्णार्तः तालुशोषी तथोदरी ॥ ७० ॥ शिरस्तिमिरच्छर्द्यार्ता गर्भिणी पांडुमेहि च । क्षतोरस्कोस्त्थाध्मान नैते धूम्या भिषग्वरैः ॥ ७१ ॥ कासश्वासप्रतिश्यायान्मन्याहनुशिरोरुजः । वातश्लेष्मविकारांश्च अन्यान् धूमः सुयोजितः ॥ ७२ ॥ चत्वारिंशच्च शमने द्वात्रिंशत् बृंहणे मता । चतुर्विंशदंगुलानि धूमनाडी च रेचने॥ ७३ ॥ षोडशांगुलकासघ्नी वमने च दशांगुला । तथैव व्रणधूपे च कुलत्थागमरंध्रका ॥ ७४ ॥ वदनेन पिबेध्धूमं वदने नैव संत्यजेत् । नासिकाभ्यां ततः पीत्वा मुखे नैव वमेत्सुधीः ॥ ७५ ॥ शरावसंपुटे क्षिप्त्वा कल्कमंगारदीपितां । छिद्रे नेत्रं विनश्यार्थं व्रणं ते नैव धूपयेत्॥७६॥

## अथ लेपक्रिया ।

अर्द्धांगुलोन्नता लेपो रात्रौ कुर्याद्भिषग्वरः । आर्द्रो व्याधिहरः सस्याच्छुष्को दूषयतिच्छविं ॥ ७७ ॥

## अथ गंडूषक्रियाः ।

स्निग्धोष्णो स्नेहिको वाते स्वादुशीतैःप्रसादनः । पित्ते कट्वम्ललवणैरूष्णैः संशोधनं कफे ॥ ७८ ॥ कषायतिक्तमधुरैः कटुष्णो रोपणे व्रणे । चतुः प्रकारगंडूषः कवलश्चापि तद्विधः ॥ ७९ ॥ द्रवेण गंडुषो धृत्वा कल्केन कवलो मुखे । वमेच्च पंचमाद्वर्षात् मुखशुद्धिकरो मतः ॥ ८० ॥

## अथ रक्तनिसृतिः ।

शरत्काले स्वभावेन कुर्याद्रक्तसृतिं नरः । पीत्वा यवागूं तृप्तस्य श्रावयेच्छोणितं बुधः ॥ ८१ ॥ शोथे दाहेंगपाके च रक्तवर्णे सृजसृतौ । वातरक्ते तथा कुष्टे सपीडे दुर्जयेनिले ॥ ८२ ॥ पाणिरोगे श्लीपदे च विषदुष्टे च शोणिते । ग्रंथ्यर्वुदापचीक्षुश्च रोगरक्ताधिगंधिषु ॥ ८३ ॥ विदारिस्तनरोगेषु गात्राणां सादगौरवे । रक्ताभिष्यंदतंद्रायां पूतिघ्राणस्य देहिके ॥ ८४ ॥ यकृत्प्लीहविसर्पेषु विद्रधौ पीडिकोद्गमे । कर्णो-

ष्टघ्राणवक्त्राणां पाके दाहे शिरोरुजि ॥ ८५ ॥ उपदंशे रक्तपित्ते रक्तश्रावः प्रशस्यते । शिराशृंगजलौकाभिर्लंबुकौरपि कारयेत् ॥ ॥ ८६ ॥ गृण्हात्वष्टांगुलं शृंगी जलौका हस्तमात्रकं ॥ द्वादशांगुल तुंबी च शिरा सर्वांगशोधनी ॥ ८७ ॥ इतिश्रीशामदत्तविरचितेयोगेश्वरेस्वरसादिक्रियाकथनंनामतृतीयः परिच्छेदः ॥ ३ ॥

## अथ नाडीपरिक्षा ।

करस्यांगुलमूले या धमनी जीवसाक्षिणी । तच्चेष्टया सुखं दुःखं ज्ञेयं कायस्य पंडितैः ॥ १ ॥ नाडी धत्ते मरुत्कोपे जलौकासर्पयोर्गतिं । कलिंगकाकमंडूकगतिं पित्तस्य कोपतः ॥ २ ॥ हंसपारावतगतिं धत्ते श्लेष्मप्रकोपतः ॥ लावतित्तिरवातिकगमनं संनिपाततः ॥ ३ ॥ कदाचिन्मंदगमना कदाचिद्वेगवाहिनी । द्विदोषकोपतो ज्ञेया हंति स्थानानि विच्युता॥४॥स्थित्वा स्थित्वा चलति या सा स्मृता प्राणघातिनी । अतिक्षीणा च शीता च जीवितं हंत्यसंशयं ॥ ५ ॥ ज्वरवेगेन धमनी सोष्णा वेगवती भवेत् । कामक्रोधाद्वेगवाहात्क्षीणचिन्ता भयप्लुतात्॥६॥ मंदाग्नेःक्षीणधातोश्च नाडी सूक्ष्मतरा भवेत् । असृक्पूर्णा भवेत्कोष्णा- गुर्वी सामा गरीयसी ॥ ७ ॥ लध्वी वहति दीप्ताग्नेस्तथा वेगवती मती । तृषितस्यास्थिरा ज्ञेया तथा बलवती मता ॥ ८ ॥ चपला क्षुधितस्य स्यात्तृप्तस्य वहति स्थिरा । यस्यां प्राणमरुद्वाति सा नाडी जीवसाक्षिणी ॥ ९ ॥ इतिनाडीपरीक्षा ॥

## अथ ऋतुचर्या ।

हेमंतश्चालिधनयोः शिशिरो ग्राहकुंभयोः । मीने मेषे वसंतः स्यात् ग्रीष्मो वृषे च मैथुने ॥ १० ॥ कर्के सिंहे मतो वर्षा कुमारि तुलयोः शरत् । ऋतुषट्कमिदंप्रोक्तं रवेराशिषु संक्रमात् ॥ ११ ॥ चयप्रकोपशमनं वायु ग्रीष्मादिषु त्रिषु । वृषादिषु च पित्तस्य श्लेष्मणः शिशिरादिषु ॥ १२ ॥ रूक्षतिक्तकषायैश्च कटुभि रसनेन च । वेगधारणव्यायामैर्बलवद्विग्रहेण च ॥ १३ ॥ व्यवायजागराजीर्णैः कंगुश्यामादिभोजनैः । वायुप्रकोपयांत्यप्सु तरणेन वृषाकृतौ ॥ १४ ॥ कट्वम्लोष्णविदाहीभिस्तीक्ष्णैर्लवणभक्षणैः । क्रोधोपवासस्त्रीसंगैरातपेन तिलालाशनैः ॥१५॥ दधिसुरातसीसूक्तात्रशनैः सदजिर्जनि । पित्तप्र-

कोपतां याति मध्यान्हे मध्यरात्रिके ॥ १६ ॥ मधुरं गुर्वति हिमदधि-दुग्धेक्षुभक्षणैः । पायसं पिष्टविकृतिर्नवान्नपयभोजनैः ॥ १७ ॥ लव-णाध्यशनसमविषमाशनभोजनैः । कफः प्रकोपतां याति आदौ मध्ये दिनस्य च ॥ १८ ॥ प्रकोपकारणैरेतैः प्रकोपमत्यसर्वगा । वातादयः त्यजंति च तनौ रोगांश्च देहिनां ॥ १९ ॥ शिरोदृक्शंखश्रोत्रभ्रूहन्म-न्यामूर्द्धसंधिषु । हनुस्कंधेषु निशिरुक् तीव्राल्पा जायते दिवा ॥२०॥ मुखेविरसता कार्श्यं वर्चसो वन्हिमांद्यता । वपुःकार्श्यं वाक्पारुष्यं निद्राभावो निशीभवेत् ॥२१॥ कटीवृषणजठरयकृद्विटपपृष्ठिषु । प्लीहक्लोम्निकुक्षिवक्षोनाभिकक्षांतरेषु च ॥ २२ ॥ स्तनबस्तित्रिकावालगु-दोपांतगुह्येषुच । भुजपादे भवेच्छूलं स्तब्धं वातभवे गदे ॥ २३ ॥ इति वातप्रकोपे ॥ मुखशोषो भ्रममदः स्वेदः संतापमूर्च्छनं । त्वग्मूत्रवत्क्र-नयननस्यविट् पीतता भवेत् ॥ २४ ॥ प्रलाप भ्रमति शिरो रुचिरेता-नि तृट्ज्वरः । गदे एते प्रजायंते शिशिरेच्छा भवत्यलं ॥ २५ ॥ ॥ इतिपित्ते ॥ अंगगौरवमंदाग्नि हृदयो क्लेशपीनसौ । मुखप्रसेको वमथुर्मुखमाधुर्यमालसं ॥२६॥ प्रज्ञाप्लुति रोमहर्षो कासश्च नेत्रपांडुता। आकांडकांडुनिद्रादि भवेत्तंद्रा कफामये ॥ २७ ॥ कंठोष्ठताल्वघ्राणा-क्षिजिव्हाश्रवणकंडुता । द्विदोषे तु द्विलिंगस्यात्त्रिलिंगं सन्निपातिका ॥ ॥ २८ ॥ इति कफप्रकोपे ॥ एतत्संक्षेपतः प्रोक्तः वातादीनां प्रकोपने । प्रकोपशांतिमधुना किंचिदत्रोच्यते मया ॥ २९ ॥ तत्रानिलःशमंत्वे-ति बस्त्यादिस्नेहसेचनैः । बलवान्नोदनैनैव मृदुमांसरसेन च ॥ ३० ॥ त्रिफलात्रिवृताद्राक्षापयोभिः सर्पिषा भवेत् । स्रंसनस्वादुरुचिरश्रुति-भिः पित्तनिर्वृतिः ॥ ३१ ॥ यवप्राशनवमनलंघनैःशिरोरेचनैः । कव-लं कट्फलादीनामुष्णैः कफनतिर्भवेत् ॥३२॥ इति वातादीनां शमनं॥ अष्टौदराणि बधिरत्यमनोविकारास्त्वर्शांसिघ्राणमुखगुह्यगुदाक्षिकर्णे। कुष्ठानिमेहप्रदरक्षयपंगुताश्च रात्र्यंध्यता तिमिरवल्मिकगंडमालाः ॥ ३३ ॥ पक्षाभिघातपवनामयरक्तपित्तमूकत्वगंभिरभगंदरहेदेहकं-पाः ॥ दंडापतानकहनुग्रहवातपित्तं वीसर्पवातरुधिरापस्मृतिश्चगुल्माः ॥३४॥ नैतेगदाःप्राक्तनकर्मजाश्च वैद्योपचारेण भवंतिसाध्याः । अतः सुधीभिः क्रियतामवेक्ष्य शास्त्रं यथोक्तं मुनिभिश्च पुण्यं ॥ ३५ ॥ इति कर्मजारोगाः ॥

## अथ तंद्रादिलिंगं ॥

इंद्रियार्थेष्वसंप्राप्तिर्गौरवं जृंभणं क्लमः । निद्रार्त्तस्यैव यस्यैते तस्य तंद्रा विनिर्दिशेत् ॥ ३६ ॥ पीत्वैकमनिलोच्छ्वासमुद्वेष्टन्विवृताननः । यं मुंचति स नेत्राश्रुं स जृंभ इतिसंज्ञिकः ॥ ३७ ॥ प्राणोदानो सं-मौस्यातां मूर्ध्निश्रोतः पथिस्थितौ । न स्युः प्रवर्तते शब्दं क्षवथुं तं वि-निर्दिशेत् ॥ ३८ ॥ योनायासश्रमो देहे प्रवृद्धश्वासवर्जितः । क्लमः स इति विज्ञेय इंद्रियार्थप्रबाधकः ॥ ३९ ॥ सुखस्पर्शप्रसंगित्वं दुःखद्वेष-णलोलता । शक्तस्य चाप्यनुत्साहः कर्मस्वलसश्चोच्यते ॥ ४० ॥ तत् क्लिशान्नं न निर्गच्छेत्प्रसेकष्ठीवनेरितं । हृदयं पीडयते चास्यं समु-त्क्लेशं विनिर्दिशेत् ॥ ४१ ॥ वक्त्रे मधुरता तं ा हृदयोद्वेष्टनं भ्रमः । नचान्नमभिकांक्षेत तं ग्लानिं तस्य निर्दिशेत ॥ ४२ ॥ आर्द्रचर्मावन द्धं च यो गात्रं मन्यते नरः । तथा गुरुशिरोत्यर्थं गौरवं तद्विनिर्दिशेत् ॥ ४३ ॥ मूर्च्छापित्तममप्रायारजः पित्तानिलात् भ्रमः । तमो वातक-फात्तंद्रा निद्रा श्लेष्मतमो भवा ॥ ४४ ॥

## अथ औषधग्रहणकालः ॥

ज्ञेयो नृणां पंचविधश्च कालो भैषज्यभक्षे प्रथमः प्रभाते । मध्या-ह्नभोज्ये निशि भोजने च त्वन्नस्य मध्ये शयनस्य काले ॥ ४५ ॥ प्रायः पित्तकफाद्रेके विरेकवमनार्थयोः । लेखनार्थे च भैषज्यं प्रभाते नान्नमाहरेत् ॥ इति प्रथमः ॥ भैषज्यं विगुणे पाने भोजनार्थे प्रशस्य-ते । अरुचाचित्रभोज्यैश्च मिश्रं रुचिरमाहरेत् ॥ ४७ ॥ इतिद्वितीयः ॥ समानवाते विगुणे मंदेग्नावग्निदीपनं । दद्याद्भोजनमध्ये तु भैषज्यं कुश-लो भिषक् ॥ ४८ ॥ व्यानकोपे च भैषज्यं भोजनांते समाहरेत् । हि-क्काक्षेपककंपेषु पूर्वमंते च भोजनात् ॥ ४९ ॥ इति तृतीयः ॥ उदाने कुपिते वाते स्वरभंगादिकर्मणि । ग्रासग्रासांतरेदेयं भैषज्यं सांध्यभो-जने ॥ ५० ॥ प्राणे प्रदुष्टे संध्यस्य भुक्तस्यांते च दीयते । मुहुर्मुहुश्च तृट्छर्दिहिक्काश्वासगरेषु च ॥ ५१ ॥ सान्नं च भेषजं दद्यादितिकाल-श्चतुर्थकः ॥५२॥ इति चतुर्थः ॥ ऊर्ध्वजत्रुविकारेषु लेखने बृंहणे तथा। पाचने शमने देयमनन्नं भेषजं निशि ॥ ५३ ॥ इति पंचमः ॥

## अथ प्रकृतयः ॥

तिस्रश्च दोषैस्त्रिविधाश्च द्वंद्वैरेकासमस्तैः प्रकृती मुनीश्वरः । वदंति सप्तेति शरीरिणांहि शुक्रास्रजैस्ताः प्रभवंति दोषैः ॥ ५४ ॥ रूक्षाल्पश्मश्रूनखकेशदेहो गीतप्रियश्चंचलचित्तदृष्टिः ॥ स्वप्ने वियच्चारित्वनार्यहिंसी भवेदनिलप्रकृतिर्मनुष्यः ॥५५॥ क्षिप्रप्रकोपी नखनेत्रजिव्हौष्टपादपाणीतलताम्रवर्णः । स्वेदोष्ममेधापलितैः समेतो भवेच्च पित्तप्रकृतौ मनुष्यः ॥ ५६ ॥ गंभीरबुद्धी बलवान् सहिष्णुः स्वप्नेंबुदर्शी प्रियदर्शनेत्र । स्निग्धालको लक्ष्मियुतो विलासी भवेच्च श्लेष्मप्रकृतितैर्नरस्य ॥ ५७ ॥ द्वयोर्लिंगं द्विप्रकृतौ त्रिलिंगात्सन्निपातिके । एवं सप्तप्रकृतयो ज्ञेयाश्च सुधिभिः सदा ॥ ५८ ॥

## अथ औषधस्य दैवतं ॥

सर्वकर्मसु भैषज्यं नवीनं शरदाहृतं । योज्यं विरेच्य वमने वसंते चाहृतं बुधैः ॥ ५९ ॥ हीनवीर्य्यं भवेच्चूर्णं द्विमासाद्वत्सरात्परं । गुटिकालेहहीनत्वं भेषजं वत्सरात्परं ॥ ६० ॥ चतुर्मासाल्लभेत्स्नेहो हीनत्वं च गुणाधिकाः । आसवो धातवो ज्ञेयाः पुराणाश्च रसादयः । ॥ ६१ ॥ व्याधे यं युक्तं यद्द्रव्यं गणोक्तमपि तत्त्यजेत् । अनुक्तमपि युक्तंयद्योज्यं तत्रहि तद्बुध ॥६२॥ इति श्रीरामदत्तविरचिते योगेश्वरे नाडीपरीक्षादिनाम चतुर्थः परिच्छेदः ॥ ४ ॥

## अथ चिकित्सा ॥

कायग्रहोर्ध्वांगशिशुजरास्त्रं दंष्ट्रावृषेषूक्तमिदं चिकित्स्यं । परीक्ष्य दोषानलदोषकालविरच्यसात्म्यप्रकृतीबलादीन् ॥ १ ॥ ज्वरः सर्वेषु बलवान् यतो रोगेषु मन्यते । ततोत्र तत्प्रतीकारः प्रथमं प्रोच्यते मया ॥ २ ॥ ज्वरो दोषैः पृथक् त्रेधा द्वंद्वैश्च त्रिविधो यतः । एकैव सन्निपातेन त्रयोदशविधो मतः ॥ ३ ॥ सन्निपातोद्भवाः प्रायः पंचैव विषमज्वराः । आगंतुकज्वरोह्येकस्त्रयोदशविधः स्मृतः ॥ ४ ॥ पंचविंशतिभेदेन ज्वरस्त्वेवं भवेत्तनौ सामेन तान् द्विविधा ज्ञात्वा लिंगैश्चिकित्सयेत् ॥ ५ ॥

## अथादौ सामज्वरचिकित्सा ॥

आमज्वरे चोष्णकलंघनाद्यैर्विपक्कदोषे मतिमान् चिकित्स्येत् ।

ध्याधेर्मृदुत्वं क्षुत्तृट्सहोदयं तावद्विलंघेत् विमलेंद्रियत्वं ॥ ६ ॥ कफे सशेषे पवने शहेनं पित्तेऽर्द्धशेषं क्वथितं जलं च । शीतं पिबेत्पाचनसिद्धिसाध्ये गदेंबुपाने विधिरेष उक्तः ॥ ७ ॥ दिवासृतं तु यत्तोयं रात्रा तद्गुरुतां व्रजेत् । रात्रौ शृतं तु दिवसे गुरुत्वमधिगच्छति ॥ ८ ॥ तदा च क्वथिते तस्मिन् जले प्रक्षिप्य संपिबेत् । तप्ता लोष्ठसिकतायः पिंडान् पाचनहेतवे ॥ ९ ॥ वाते कृष्णा किरातांबु पित्ते पर्पटमुस्तजं । कफे भूनिंबविश्वांबु पिबेदष्टावशेषितं ॥ १० ॥ स्याज्जीर्णेछणाश्वमलं तथानिंबोद्भवं रजः । उष्णमर्वाक् त्रिरात्राच्च बध्नीयान्मलशोधनं ॥ ११ ॥ कृष्णाभयाग्निसिंधूनां सूक्ष्मचूर्णं पिबेज्जलैः । मलाश्वरेचयेदुष्णैस्त्रिरात्रं प्रथमं सुधीः ॥ १२ ॥ कृष्णाभयैलेययवाग्रजं च तिक्ताग्निदंती सहितं विचूर्ण्य । त्रिवृत्कषायेण पिबेच्च कर्षं ज्वरापहं तन्मलशोधनं च ॥ १३ ॥ दरदं टंकणं शुंठी पिप्पली चैककार्षिकं । हेमाव्हा पलमात्रां स्यात् दंतीबीजं च तत्समं ॥ १४ ॥ विचूर्ण्यैकत्र सर्वाणि गोदुग्धेनैव भावयेत् । त्रिगुंजं रेचनं दद्या विष्टंभाध्मानरोगिषु ॥ १५ ॥ इति इच्छाविभेदः ॥ व्याधिश्च मार्दवं ज्ञात्वा लंघिते शालिमुद्गजं । यथोक्तं दापयेत्पथ्यं पीते क्वाथे भिषग्वरैः ॥ १६ ॥

## अथ वातज्वरचिकित्सा ॥

वातारिमूलस्वरसो पिप्पल्यासहितो जयेत् । सर्वान् वातज्वरान् तीव्रान् तथा रास्नाभवोथवा ॥ १७ ॥ रास्नाहरीतकीशुंठचरुबुकामृतदारुणां । क्वाथः पीतो हरेत्प्रातः समीरणभवज्वरान् ॥ १८ ॥ सारिवायाः कृतः फांटः पिप्पलीमूलसंयुतः । तथैव भूनिंबहिमो वातज्वरहरः स्मृतः ॥ १९ ॥ भूनिंबपिप्पलीकल्को मधुना वातनाशनः रसोनातिविषा पीता सिंधुचूर्णं तथा भवेत् ॥ २० ॥ मुस्तापथ्या कणा विश्वा त्रुटीनां कारयेद्गुटिं । गुडेनभक्षणात् हंति त्रिदिनाद्वातजं ज्वरं ॥ २१ ॥

## अथ अग्निकुमारः ॥

सूतं गंधं विषं शंखं कपर्दा च कणोषणं । चंद्रैकाग्निगजद्वित्री वसुभागैर्विमर्दयेत् ॥ २२ ॥ जंबीरफेनैः संमर्दो जयेदग्निकुमारकः । गुंजैकज्वरमंदाग्निविण्मूत्रशिरसोग्रहं ॥ २३ ॥

## अथ पित्तज्वरः ॥

द्राक्षायाः ससितायुक्तः पीतः पित्तज्वरं जयेत् । निंबपत्रभवोमंथः पित्तज्वरविनाशनः ॥ २४ ॥ पर्पटाब्दकटुद्राक्षाराजवृक्षाभयाकृतः । क्वाथःपित्तज्वरं हन्यात् दाहतृष्णाभ्रमान्वितं ॥ २५ ॥ ससितस्त्रिफलाफांटःपित्तजंनाशयेज्वरं । तथोशिराम्रजंबूनां समधूशर्करो हिमः॥२६॥ तंदुलांबुसितायुक्तो र्‍हीवेरं चंदनोद्भवः कल्को मेहास्रदाहाढ्यं नाशयेत् पैत्तिकंज्वरं ॥ २७ ॥ त्रिफलापद्मकोशिरगुडूचीसारसंभवं । शाणोन्मितं जयेच्चूर्णं ससितं पित्तजं गदं ॥ २८ ॥ आमलं कमलं कुष्ठं लाजाश्च वटरोहकं । एतेषां मधुना हन्यात् गुटी पित्तयुतं ज्वरं ॥ २८ ॥ पित्तोत्तरे त्रिवृच्चूर्णं द्राक्षाक्वाथादिभिः पिबेत् । हिमाहरीतकीचूर्णं तथापित्ते विरेचनं ॥ २९ ॥ चंदनोशीरकर्पूरमलयागरुलेपनं । हंन्यादरिष्टफेनेन सोष्माणं सतृडं ज्वरं ॥ ३० ॥ समं विशेषणं पिष्ट्वा धत्तूरकरसेन च । शरावसंपुटे दग्ध्वा त्रिंशद्भिर्गोमयोत्पलैः ॥ ३१ ॥ स्वांगशीतं विचूर्ण्याथवल्लैकं सितयासह । त्रिदिनांते ज्वरंहन्याद्दातपित्तंकफोद्भवं ॥ ३२ ॥

## अथ कफज्वरचिकित्सा ॥

वासारसो मधुयुतो बलासज्वरनाशनः । देवदालीफलरसो वमने च तथा विधः ॥ ३३ ॥ समूलपिप्पलीशुंठीचव्यचित्रकभिः कृतः । क्वाथः कृतः कफं हन्याज्वरं हृल्लाससंयुतं ॥ ३४ ॥ आरग्वधभवः फांटः ससैंधवजयेत्तथा । भार्गीविश्वोद्भवो हिमः सश्वासं मधुना कफ ॥ ३५ ॥ एलात्वक्पत्रकल्कस्तु मधुना कफनाशनः । मधुना पिप्पलीचूर्णं लेहेत्कासज्वरापहं ॥ ३६ ॥ व्योषाम्लवेतसं चव्यं तालीसं चित्रजीरकं । तित्तिडीकं पृथक्कर्षं त्रिसुगंधि त्रिशाणिकं ॥ ३७ ॥ गुडेन गुटिका सेव्यं पीनसश्वासकासजित् । रुचिस्वरकरी ख्याता प्रतिश्यायप्रणाशिनी ॥ ३८ ॥ शुंठीचूर्णेन नासाभ्यां धूमपीनसनाशनः । वचाविश्वागदंलेपाच्छिरःशूलं प्रशाम्यति ॥ ३९ ॥ आकल्करश्चेंद्रिफलं च विश्वा पथ्याकणैलेयबली पृथक्पलं । शुद्धोरसः कोलमितो विधाय दिनं विमर्द्यो स्वरसेन खल्वे ॥ ४० ॥ कृत्वा गुटी शाणमितं ज्वरघ्नी दद्याद्बुधः सद्यभवे ज्वरेच । योज्योनुपाने गुडुचीरसश्च सर्वोद्भवं हंति गुटी ज्वरं च ॥ ४१ ॥ ज्वरघ्नी गुटिका ॥

## अथ वातपित्तज्वरे॥

छिन्नामलीफलरसं मधुना वातपित्तहा। द्राक्षाफलत्रिकं फांटो मधुना वातपित्तजित्॥ ४२॥ किरातविश्वागुडुचीमुस्तापर्पटकैः शृतं। वातपित्तज्वरं हन्यात्पाचनं पंचभद्रकं॥ ४३॥ एलाकिरातकल्कस्तु ससितो वातपित्तनुत्। त्रिफलाग्निकिरातानां चूर्णं च मधुना तथा॥ ॥ ४४॥ हिमाहरीतकीपथ्याशुंठीभिर्गुटिका कृता। गुडेनवातपित्तघ्नी लेखनी वह्निदीपनी॥ ४२॥

## अथ वातकफज्वरचिकित्सा॥

हरिद्रार्द्रकस्वरसो मधुना कफवातनुत्। घृताभ्यक्तं तथा भृष्टं मुखस्थं च बिभीतकं॥ ४६॥ पथ्यारग्वधकटुकाग्रंथिमुस्ताकषायकः। सामशूलज्वरं हन्यात्कफवातसमुद्भवं॥ ४७॥ वासाक्षुद्रावचाग्निमो मधुना श्लेष्मवातनुत्। त्वगेलापत्रकल्कस्तु मधुना तन्निबर्हणं॥ ४८॥ कट्फलांबुधरं भार्गी शृंगी दारुदुरालभा। रजो रोहीषशुंठयौ च वचा पथ्या विचूर्णयेत्॥ ४९॥ एषां कर्षमितं चूर्णं मधुना नाशयेज्ज्वरं कफवातोद्भवं तंद्रां शीतश्वाससमन्वितं॥ ५०॥ व्योषाम्लवेतसं चव्यतालीसं चित्रकं वचा। जीरकं गुटिका चैषां मधुना नाशयेत्कफं॥ ॥ ५१॥ सक्षीरं मदनं पीत्वा वमेद्वातकफामयी। कृष्णाशुंठित्रिवृत्सिंधुरेचनं मधुना पिबेत्॥ ५२॥

## अथ पित्तकफज्वरः॥

गुडूची वासकरसो मधुना कफपित्तनुत्। त्रिफलाशुंठिहिमस्तु कफपित्तज्वरं जयेत्॥ ५३॥ पद्मकारिष्टगुडूचीधान्यलोहितचंदनं। पिबेत्सच्छर्दितृट्दाहे ज्वरे पित्तकफोद्भवे॥ ५४॥ ग्रंथिकोशीरफांटस्तु मधुना कफपित्तजित्। खदीरशुंठिभूनिंबकल्कस्तु मधुना तथा॥ ५६॥ त्रिफलापिप्पलीचूर्णं खदिरक्काथसंयुतं। त्रिवृद्गुडाभयाशुंठीगुटिका कफपित्तजित्॥ ५७॥

## अथ विषमज्वरचिकित्सा॥

संततः सततोन्येद्युस्तृतीयकचतुर्थकौ। पंचैते विषमा ज्ञेयाचिकित्सैषां च प्रोच्यते॥ ५८॥ तुलसीपत्रस्वरसो द्रोणपुष्परसोथवा। पी-

तो मरिचचूर्णेन निहंतिविषमज्वरान् ॥ ५९ ॥ गुडूच्याः काग्वेल्या वा निंबपत्ररसोथवा । अजाजीचूर्णसहितो निहंति विषमज्वरान्॥६०॥ क्षुद्राधान्यपटोलशुंठिकटुकामुस्ताऽमृतापद्मकैर्वासापुष्कररक्तचंदनरजोभार्गींद्रजारिष्टकैः । क्वाथः शीतप्रलापछर्दिसहितान् हन्यात् कृमिं कामलं । पंचैवं विषमज्वरान् कफमरुत्पित्तं सदाहं तृषां ॥६१॥ शुंठी क्षुद्राऽमृता धात्री मुस्ताक्वाथः समाक्षिकः । पिप्पलीचूर्णयुक्तश्च जयेच्च विषमज्वरान् ॥ ६२ ॥ पटोलत्रिफलानिंबद्राक्षाशम्याकवासकैः । क्वाथः सितामधुयुतो जयेदेकाहिकं ज्वरं ॥ ६३ ॥ मुस्ताधान्यामृतोशीरशुंठीहिमशृतं पिबेत् । तृतीयज्वरनाशाय सितामधुयुतं नरः ॥६४॥ वासापथ्यास्थिराधात्रीदेवदारुमहौषधैः । क्वाथः सितामधुयुतो हंति चातुर्थिकं ज्वरं ॥ ६५ ॥ सिंहींद्रजाऽमृतारिष्टग्रंथिभिर्मधुनाशृतः । कृष्णामृताशिवाभिर्वा पुराणविषमज्वरे ॥ ६६ ॥ अमृताह्वाशिवक्वाथो मधुनाविषमं हरेत् । क्वाथो जीर्णज्वरं हंति गुडूचीपिप्पलीयुतः ॥ ६७ ॥ द्राक्षात्रिफलया फांटः सितामधुयुता जयेत् । वातपित्तज्वरं दाहं तृष्णा मूर्च्छारतिभ्रमात् ॥ ६८ ॥ गुडूची हिमः सकणो जीर्णज्वरहरः स्मृतः । तथा निंबगुडूच्यावा समधुस्त्रिफलोद्भवः ॥ ६९ ॥ युक्तो रसोनकल्कस्तु तैलेन विषमं ज्वरं । वर्धमानपिप्पलीं हंति मधुना पिप्पली तथा ॥ ७० ॥ त्रिफलापिप्पलीचूर्णं मधुना विषमज्वरं । हंति त्रिकटुचित्राब्दपथ्याचूर्णं गुडेनच ॥७१॥ श्रेष्ठा ह्रीरजनी सठी बृहतिरुक् व्योषाऽमृता पुष्करं मूर्वा ग्रंथिकशालिपर्णिकटुका वासाब्दयष्टीमधुः । निंबोशीरबला रजोनलवचा भार्गींद्रजत्वक्फलं सिंधूबीजसुराष्ट्रजा हिमविषा त्रायंतिका पद्मकं ॥ ७२ ॥ तालीसत्रिसुगंधिचित्रचविकादारुविडंगागरूपीलूपर्णियवानिपुष्पतगरं काकोलिपत्राऽर्षभं । जातीपत्रपटोलवंशकमलं कृत्वा समं चूर्णयेत् तस्मादर्धमितं किरातकरजो स्त्वेकत्रसूक्ष्मं नयेत् ॥ ७३ ॥ एतत् सुदर्शनं चूर्णं सर्वज्वरहरं परं । कासं तंद्राभ्रमं श्वासं हृद्रोगं हंति कामलं ॥ ७४ ॥ भवेद्गुडाजाजिगुटी विषमज्वरनाशिनी । त्रिफलायाः कृता भक्षेन्मधुना गुटिका नरः ॥ ७५ ॥ दशांघ्रिशंखाव्हबलास्वगुप्तागुडूच्यपामार्गकधन्वयासकं । रास्नाग्निभार्गीगजपिप्पली च राढी वृकी ग्रंथिकमौषधं च ॥ ७६ ॥ एतानि ग्राह्याणि पृथक्यवाढक पथ्याशतं पंचघटे जले प-

चेत्। पादावशिष्टे क्थने पुनः शिवा गुडान्क्षिपेत्तत्र पचेच्छनैः सुधीः ॥ ७७ ॥ कृष्णाज्यतैलात्पृथगंजलिः क्षिपेत् सिद्धे मधूनः कुडवं सिते क्षिपेत्। अर्शोरुचिश्वासकफे क्षये ज्वरे योज्यावलेहो ग्रहणी ज्वरातुरं ॥ ७८ ॥ इति अगस्तिहरीतकी ॥ शुद्धं सूतं विषं गंधं पृथक्शाणं त्रिशाणिकं। धूर्त्तबीजं तु हेमाव्हा सर्वेभ्यो द्विगुणा भवेत् ॥ ७९ ॥ सूक्ष्मं पिष्ट्वा द्विगुंजं च देयं जंबीरमज्जया । आर्द्रकस्य रसैर्वापि ज्वरं हंति त्रिदोषजं ॥ ८०॥ एकाहिकं द्व्याहिकं च त्र्याहिकं वा चतुर्थकं। विषमं च ज्वरं हन्याद्विख्यातो यं ज्वरांकुशः ॥ ८१ ॥ इतिज्वरांकुशः। वासकरसपुष्पेषु पक्वं च मधुना पिबेत्। सर्पिः श्वासे कफे शोषे ज्वरे भ्रांतौ स्वरक्षये ॥ ८२ ॥ इति वासकाज्यं ॥ मूर्वा स्वर्जिगदारुणाजतुनिशौषधैः स्मृतं ॥ तक्रेण तैलमभ्यंगात् जीर्णज्वरोष्णशीतनुत् ॥८३॥ इति मूर्वादितैलं ॥ जीर्णं घृतं रामठाभ्यां नस्यं चातुर्थिकं हरेत्। चातुर्थिकहरं नस्यं मुनिद्रुमदलांबुना ॥ ८४ ॥ इति श्रीशामदत्तविरचिते योगेश्वरे सामज्वरादिचिकित्सितं नाम पंचमः परिच्छेदः ॥ ५ ॥

## अथ सन्निपातचिकित्सा ॥

संधिगांतकरुग्दाहः शीतांगश्चित्तविभ्रमः । तंद्रिकः कंठकुब्जश्च कर्णको भग्ननेत्रकः ॥ १ ॥ रक्तष्ठीवि प्रलापी च जिव्हकश्चाभिन्यासकः। एतेषां सन्निपातानां चिकित्स्यमधुनोच्यते ॥ २ ॥

## अथ संधिकचिकित्सा ॥

संधिके सन्निपाते तु शूलं कासोतिवेदना। कफपूर्णास्यशोषं च संधिके लक्षणं त्विदं ॥ ३ ॥ संधिके लंघनं कुर्यात् रूक्षं कर्म च पाययेत्। कुलत्थांबुसक्तुष्णं वा शुंठीक्वाथं ससैंधवं ॥ ३ ॥ रास्नागुडूचीसठिवृद्धदारुसुराव्हविश्वात्रिफलावरीभिः । क्वाथं पिबेद्गुग्गुलुसंप्रयुक्तं समस्तसंधिग्रहसन्निपाते ॥ ४ ॥ विश्वामृतारुबूकाणां पिबेत्फांटं सपिप्पलीं। रास्नापथ्यासुराव्हाणां सक्तुष्णं संधिके हिमं ॥ ५ ॥ संधिके मधुना कृष्णालेहेदनुष्णकं पिबेत्। त्रिसुगंधिवचाचूर्णं मधुना संधिकं जयेत् ॥६ ॥ चतुर्जाता मृतारास्ना वचाभूनिंबग्रंथिकं। एषां गुडेन गुटिका सशोथं संधिकं जयेत् ॥ ७ ॥ शतावरी बलायुग्मं पर्ण्यौ गंधर्वहस्तकः। अश्वगंधा श्वदंष्ट्रा च विल्वः कासकुरंटकः ॥ ८ ॥ एषां

सार्द्धपलान् भागान् कल्कयित्वा विपाचयेत् । चतुर्गुणेन नीरेण पाद-
शेषं शृतं नयेत्॥९॥नियोज्यंतैलप्रस्थेन क्षीरप्रस्थं विनिक्षिपेत् । शता-
वरीदेवदारुमांसीतगरचंदनं ॥ १० ॥ शतपुष्पाबलाकुष्ठमेलाशैलेय-
मुत्पलं ॥ ११ ॥ ऋद्धिर्मेदा च मधुकं काकोलीजीवकस्तथा । एषां
कर्षसमैः कल्कैस्तैलं च वन्हिना पचेत् ॥ १२ ॥ लघुनारायणेनैव नरः
स्त्रीषु वृषायते । नारी च लभते पुत्रं योनिशूलं च नश्यति ॥ १३ ॥
अंगशूलं शिरःशूलं पांडुतां कामलां गरं । गृध्रसीं प्लीहशोषांश्च मेहान्
दंडापतानकं ॥ १४॥ सदाहं वातरक्तं च वातपित्तमथार्दितं । असृग्दरं
तथाध्मानं रक्तपित्तं नियच्छति ॥ १५ ॥ इति नारायणतैलं ॥ शुद्धसू-
ताद्द्विधा गंधं मारितंचाभ्रकं समं । त्रिक्षारजीरकव्योषं त्रिफलालवणैः
समं ॥ १६ ॥ चित्रकस्य कषायेण दिनैकं मर्दयेद् दृढं । पंचगुंजा
मितं खादेत्संधिजारिरसः स्मृतः ॥ १७ ॥ कृष्णाग्निमंथसिंधुत्वक्
शुंठी दारुपुनर्नवा । शिवापुराणपिण्याकं लेपो मूत्रेण शोथहा ॥ १८ ॥

## अथ अंतकचिकित्सा ॥

दाहमोहः शिरः कंपो हिक्का कासोंगकंपनं । संतापं चांतिके ज्ञेयं
दशाहान्यतिमारके ॥ १९ ॥ आमलीफलस्वरसो ससितश्चांतिके पि-
बेत् । चंदनौषधभार्गीणां मंथो हि ससितोंतिके ॥ २० ॥ भूनिंब क-
टुका भार्गी शठी शृंगी च पुष्करं । पाठा वासाऽमृता शुंठ्यो भवेदंत-
कहा स्मृतः ॥ २१ ॥ शुंठीचंदनभार्गीणां ससितोंतकहा हिमः । त्रि-
जातदारुभूनिंबकल्कस्तु मधुना तथा ॥ २२ ॥ खदिरोषणशुंठीनां
चूर्णं च मधुनांतके । त्वगेलाकट्फलंभार्गी पथ्यागुडगुटी तथा ॥
॥ २३ ॥ शुद्धसुतं द्विधा गंधं मृतं लोहाभ्रताम्रकं । विषतालककंकु-
ष्ठशिलादरदचित्रकं ॥ २४ ॥ त्र्यूषणातिविषैरंडभृंगी कुंभी च माक्षि-
कं । त्रिदिनं मर्दयेत्खल्वे द्रवैरार्द्रकसंभवैः ॥ २५ ॥ निर्गुंडीविजया-
द्रावैस्त्रिदिनं मर्द्दयेत्पुनः । जंबीरस्य च चांगेर्याद्रावैश्च मर्द्दयेद्दिनं॥२६॥
काचकुप्यां निवेश्याथ वालुकायंत्रगं पचेत् । द्वियामांते समुधृत्य म-
र्द्दयेदार्द्रकद्रवैः ॥ २७ ॥ दिनैकशोषितं चूर्णं त्रिगुंजं सन्निपातजित् ।
मृतसंजीवनोनाम रसोयं शकरोदितः ॥ २८ ॥ इतिरसः ॥

## अथ रुग्दाहचिकित्सा ॥

विंशत्यहानि रुग्दाहे मोहस्तापो भ्रमः श्रमः । कंठे व्यथातितृट्जा-

ध्वं प्रलापः श्वासदुर्गमे ॥ २९ ॥ द्राक्षागुंजापत्ररसो रुग्दाहे ससितः पिबेत् । तथामलयजोशीरमुस्तापर्पटजो हिमः ॥ ३० ॥ ब्राह्मी द्राक्षा जलधरः चा भीरुशम्याकतिक्ता पथ्या धात्री कलितरुबलां निंबकोशातकीभिः । भूनिंबाढ्यो भवति सहितः पंचमूलीद्वयेन पीतः क्वाथः सकलपवनव्याधिरुग्दाहहंता ॥ ३१ ॥ अभयापर्पटोशीरकटुकाब्दामृतोद्भवः । फांटः सशर्करो हंतिरुग्दाहं पानतोभृशं ॥ ३२ ॥ खदीरसारकल्कं च चंदनं तंदुलांबुना । पिबेन्मधुसितायुक्तं रुग्दाहे संनिपातिके ॥ ३३ ॥ त्रिसुगंधितगाक्षीरीपथ्यामलकधान्यकैः । चूर्णं खदिरक्वाथेन पीतं रुग्दाहकं जयेत् ॥ ३४ ॥ वटप्ररोहधान्याब्दपथ्याद्राक्षाम्लवेतसैः । शर्करामधुना हंति रुग्दाहं गुटिका कृता ॥ ३५ ॥ शुद्धसूतं मृतं ताम्रं गंधं मर्द्यं समं गवां । दिनं क्षीरेण निर्गुंडीरसेन तं च गोलकं ॥ ३६ ॥ त्रियामं वालुकायंत्रे त्वंधमूषायुतं पचेत् । स्वांगशीतं समुधृत्य चाष्टमांशविषं क्षिपेत् ॥ ३७ ॥ त्रिनेत्राख्यो रसो नाम्ना सन्निपातेतिदारुणे । तस्य गुंजाद्वयं देयं पंचकोलं पिबेदनु ॥ ३८ ॥ इतिरसाः ॥ श्रीखंडारिष्टबदरीपल्लवोत्थफेनलेपनात् । हस्तपादतलेष्वेव दाहश्च क्षीयते ध्रुवं ॥ ३९ ॥

## अथ चित्तविभ्रमचिकित्सा ॥

मदमोहभ्रमस्तापो हास्यं गीतं प्रलापनं । नृत्यं वैकल्यता पीडा विकटाक्षे विचक्षणं ॥ ४० ॥ चिन्हान्येतानि जायंते चित्तविभ्रमसंज्ञिके। त्रिवर्षं तस्य संख्यास्या सुसाध्ये सन्निपातके ॥ ४१ ॥ मधुकुष्ठयुतो ब्राह्मीरसश्चित्तभ्रमं जयेत् । दुरालभामृताफांटः सकृष्णाज्यस्तथाविधः ॥ ४२ ॥ क्षुद्रा पटोलकटुका त्रिफला रजनीद्वयं । मुस्तैषां च पिबेत् क्वाथं चित्तविभ्रमसंज्ञिके ॥ ४३ ॥ पथ्या पटोलकटुकाभूनिंबं दारुपर्पटैः । भवेत्सतीक्ष्णहिमस्तु चित्तविभ्रमनाशनः ॥ ४४ ॥ ब्राह्मीमरिचकल्कस्तु घृतेन चित्तविभ्रमे । त्रिकटुत्रिफलाब्दानां गोदुग्धेन पिबेद्रजं ॥ ४५ ॥ अजमोदाऽमृताभार्गीब्राह्मीमरिचग्रंथिकैः । शर्कराविहिता हंति गुटी च चित्तविभ्रमं ॥ ४६ ॥ कणोषणोग्रालवणोत्तमानि करंजबीजक्षणदामलानि । पथ्याक्षसिद्धार्थकहिंगुशुंठीयुतानि वस्तांबु विमिश्रितानि ॥ ४७ ॥ पिष्ट्वा गुटीयं नयने विधेया प्रचेतनेतिप्रथिता भिषग्भिः । चित्तभ्रमापस्मृतिभूतदोषशिरोक्षिरोगभ्रमनाशहेतुः ४८॥

615.526
SHY



॥ इति अंजनगुटी ॥ मृतं सूताभ्रकं शुद्धं हिंगूलं तालमाक्षिकं । सममेतत् द्रवैरेतैस्त्रिदिनं मर्द्दयेद्भिषक् ॥ ४९ ॥ निंबं पटोलधत्तूरनिर्गुंडीभृंगिचित्रजैः । जातिजंबीरजैर्बोलं त्रिक्षारं सैंधवं विषं ॥ ५० ॥ एकीकृत्य भवेत्सिद्धः सन्निपातगजांकुशः । सन्निपातं निहंत्याशु माषमात्रं प्रयोजयेत् ॥ ५१ ॥ इतिरसः ॥

## अथ शीतांगचिकित्सा ॥

हिमशिशिरशरीरो वेपथुश्वासहिक्का शिथिलितविकलांगः स्विन्नतोदोंगतापः। क्रमथुदवथुकासच्छर्यतीसारसेकस्त्वरितमरणपक्षमेकशीतांगभावात् ॥ ५२ ॥ नागवल्ल्यार्द्रकरसाः शीतांगं मधुना जयेत् । तथा रसोनसंयुक्तस्त्रिकटुक्वाथ एव च ॥ ५३ ॥ भूनिंबभार्गीत्रिफलाब्दवासात्रायंतिनीवातिविषावचाभिः। व्योषामृतायासपटोलब्राह्मीशयोनाकरास्नाकटुकेंद्रबीजैः ॥ ५४ ॥ दारुहिक्षुद्राद्विनिशाविशालात्रिवृत्सठीभिः कथितः कषायः । सर्वोद्भवान् सर्वज्वरान् निहंति श्वासं च शीतं पवनं कफं च ॥ ५५ ॥ दारुव्योषार्कमूलानां हिमःशीते सग्रंथिकः । तथा कस्तूरिकल्कस्तु नागवल्लीरसैः पिबेत् ॥ ५६ ॥ व्योषाभयाचतुर्जातलवंगसंभवं रजः । मधुना नाशयेल्लीढं शीतं त्रिदोषसंभवं ॥ ५७ ॥ शुंठीसठीवचायुक्तं कटुतैलश्रृतं हरेत् । तथा रसोनस्वरसे शीतमभ्यंगनात् द्रुतं ॥ ५८ ॥ कर्कोटिकाकंदरजःकुलत्थकृष्णावचाभ्रकक्रुष्णजीरैः । किराततिक्ताग्निकशुंठिराजीपथ्याभिरुद्वर्त्तनमत्रशस्तं ॥ ५९ ॥ विषं त्रिकटुकं गंधं टंकणं मृतशुल्बकं । धत्तूरस्य च बीजानि हिंगुलं पिप्पली तथा ॥ ६० ॥ एतानि समभागानि दिनैकं विजयाद्रवैः । मर्द्दयेच्चणकाभा तु वटिकानंदभैरवी ॥ ६१ ॥ भक्षयेच्च पिबेच्चानु रविमूलकषायकं । सव्योषं हंति साचित्रं सन्निपातंसुदारुणं ॥ ६२ ॥ मृतसंजीवनो वाथ रसगुंजाद्वयं हितं । दातव्यं पंचवक्त्रोवा शीतांगंनाशयेत् ध्रुवं ॥ ६३ ॥

## अथ तंद्रिकचिकित्सा ॥

अतितंद्रा ज्वरः श्वासः क्रमस्तापोतिसारतृट् । कंठे कंडू शूलकंपं श्यामाजिव्हा कफाल्पता ॥ ६४ ॥ एतानि तंद्रिके साध्ये पंचविंशतिवासराः । पटोलीस्वरसो हंति सव्योषस्तंद्रिकं ध्रुवं ॥ ६५ ॥ भूनिंब-



IGNCA RAR
R-347
ACC. No.

शुंठीकटुकाब्ददारुदशांघ्रिधान्येभकर्णेंद्रबीजैः। कृतः कषायः कस-नार्तिशूलश्वासान्वितं तंद्रिकमाशु हंति ॥ ६६ ॥ कृष्णामरिचकल्कस्तु मधुना तंद्रिकं जयेत्। तथा व्योषाभयाजातीफलपुष्पोद्भवं रजः ॥ ६७ ॥ आरण्योत्पलजं भस्मं तदंशं मरिचं विषं। आर्द्रकस्य रसेनैषां वर्तिं कुर्यात् त्रिरक्तिकां ॥ ६८ ॥ शुंठीक्वाथानुपानेन जयेत् तंद्रिकजां व्यथां। अथवा भक्षयेद्रोगी चानंदभैरवं रसं ॥६९॥ वचाद्विरजनीव्योषैर्बस्तमूत्रेण पेषितैः। सकुष्ठैर्नस्यतो हंति तंद्रिकं सन्निपातिकं ॥ ७० ॥ करवीरपत्ररसैः पिष्ट्वा कृष्णामनःशिले। अंचनाच्च कृता वर्ति जयेत्तंद्रां त्रिदोषजां ॥ ७१ ॥

## अथ कंठकुब्जचिकित्सा ॥

कंठग्रहो ज्वरो मूर्च्छा दाहकंपो विलापनं। मोहस्तापः शिरोर्तिश्च वातार्तः प्रलपन् श्वसन् ॥ ७२ ॥ कंठकुब्जं सन्निपातं कष्टसाध्यं विनिर्दिशेत्। तस्य संख्या दिनान्याहुस्त्रयोदशमितानवै ॥ ७३ ॥ कंठकुब्जं हरेत्तीक्ष्णयुतो भृंगरसस्तथा। फांटो द्राक्षामृतामुस्ताक्षुद्रावासककट्फलैः ॥ ७४ ॥ शृंगीवत्सककेतकीघनसठीभूनिंबभार्गीनिशातिक्तापुष्करचित्रकैश्च चविको शुंठीकणाकट्फलैः। धात्रीदारुविभीतकैः समरिचैर्व्याघ्रीवृषोन्मिश्रितैरेभिःक्रंदति कंठकुब्जमचिरात्कोष्णः कषायः कृतः ॥ ७५ ॥ लवंगातिविषाकृष्णाजयेत्कल्कोंऽजवारिणा। कंठकुब्जं तथा व्योषत्रिफलाधान्यचूर्णकं ॥ ७६ ॥ रसंगंधकतुल्यांशं धत्तूरफलजैर्द्रवैः। मर्दयेत् दिनमेकं तु तत्तुल्यं त्रिकटु क्षिपेत् ॥ ॥ ७७ ॥ उन्मताख्यो रसो नाम नस्ये स्यात्सन्निपातजित्। अथवाऽनंदभैरवं विधिना दापयेद्भिषक् ॥ ७८ ॥

## अथ कर्णकचिकित्सा ॥

ज्वरश्च कर्णशोफं च श्वासकंपप्रलापवान्। स्वेदः कंठग्रहस्तापो हृल्लासोंगव्यथापि च ॥ ७९ ॥ कर्णिके कष्टसाध्ये च त्रिमासं लक्षणानि वै। ग्रंथे रक्तं जलौकाभिर्हृत्वापानं घृतस्य च ॥ ८० ॥ रास्नापथ्या वचा भार्गी बृहती व्योषपुष्करं। स्यात् शृंग्यब्दामृताकटचस्तेषां कर्णकहा शृतः ॥ ८१ ॥ दशमूलोद्भवः फांटः सकृष्णः कर्णकं हरेत्। तथोग्रात्रिफलाशुंठीभूनिंबकटुकाहिमः ॥ ८२ ॥ व्योषं सदि-

रकल्कस्तु मधुना कर्णकं हरेत् । क्षारकृष्णा चतुर्जातचूर्णमुष्णांबुना तथा ॥ ८३ ॥ दंतीचित्रकयोर्मूलं स्नुह्यर्कपयसागुडः । भल्लातकास्थिकासीसं लेपो भिंद्याच्छिलामपि ॥ ८४ ॥ खादिरजनीकृष्णसिंधूववरुणलेपनात् । कर्णशोथः शमं याति कुमारीबंधनात्तथा ॥ ८५ ॥ सर्पकंकालिपत्राणि जलपक्वानि बंधनात् । कर्णग्रंथिहराण्याहुस्तन्मूलं लेपनादनु ॥ ८६ ॥ शुल्बं सूतं बलिं तालं माक्षिकं मृतताम्रकं । मृत्ताभ्रकं विषं बोलधूर्त्तबीजं पटोलकं ॥ ८७ ॥ पाठा शृंगी वचा हिंगुः शुंठी क्षारत्रयं समं । सर्वं जंबीरस्वरसैर्दिनैकं मर्द्दयेद् दृढं ॥८८॥ चणप्रमाणा वटिका सन्निपातं सुदारुणं । निहन्यादनुपानेन दशमूलार्कजेन वा ॥ ८९ ॥ कषायेण न संदेहः पथ्यं दध्योदनं हितं । रसो विध्वंसको नाम सन्निपातं निकृंतयेत् ॥ ९० ॥

## अथ भग्ननेत्रचिकित्सा ॥

ज्वरबलोपचयस्मृतिशून्यता श्वसनभग्नविलोचनमोहितः । प्रलपनभ्रमकंपनशोफवान् त्यजति जीवितमाशु समभग्नदृक् ॥ ९१ ॥ शिग्रुमूलरसो हंतिभग्ननेत्रं सतिक्तकः । श्लेष्मापटोलिकटुकाफांटः समरिचस्तथा ॥ ९२ ॥ क्षुद्रा द्विरजनी निंबपटोलत्रिफलाकटुः । मुस्तैषां गतचैतन्यं भग्ननेत्रं हरेत् शृतः ॥ ९३ ॥ मुस्तापटोलत्रिफलाहिमो दारुयुतो जयेत् । भग्ननेत्रं वचाशुंठीकल्कश्च मधुना तथा ॥ ९४ ॥ किराततिक्तोषणराजिकानां मधूयुतानां प्रवरोवलेहः । सिंधूकसोरोषणरामठोयं नस्येंजनेस्यान्मधुसिंधुकृष्णं ॥ ९५ ॥

## अथ रक्तष्ठीवीचिकित्सा ॥

रक्तष्ठीवीज्वरवमितृषामोहशूलातिसारो हिक्काध्मानभ्रमणवमथुश्वासंसंज्ञाप्रणाशः । श्यामारक्ताधिकतरतनुर्मंडलोत्थानरूपो रक्तष्ठीवीगदितदशदिनं प्राणहंता प्रसिद्धः ॥ ९६ ॥ दाडिमीपुष्पस्वरसो हंति रक्तं सशर्करः । उदुंबराश्वत्थफलं फांटः सशर्करस्तथा ॥ ९७ ॥ पद्मकाष्ठवरिजातिचंदनं निंबयष्टिमलयोद्भवारुणा । पर्पटामलकपिप्पलीहरेत् क्काथरक्तवमनं शृतोभिः ॥ ९८ ॥ वासायासरजःकट्वीभूतृणफलिनीभवः । रक्तष्ठीविसन्निपातं हरेत्सशर्करो हिमः ॥ ९९ ॥ नस्यं दाडिमपुष्पोत्थं रसो दूर्वाभयोथवा । आम्रास्थि च पलांडोर्वा नासि-

क्काच्युतरक्तजित् ॥ १०० ॥ शुद्धं सूतं बलिं भस्मताम्रायस्तारसंभवं सर्वं समं विमर्द्येत कन्याग्नित्रिफलाद्रवैः ॥ १०१ ॥ धत्तूरार्द्रकनिर्गुंडीदार्वीवायसनिंबजैः । मंडूक्यासनवातारिद्रवैर्दिनं पृथक् पृथक् ॥ ॥ २ ॥ व्योषं सर्वसमं क्षिप्त्वा चणका कृत्यदापयेत् । तिस्रजीरार्द्रकश्वानुपंचास्युत्थशृतं पिबेत् ॥ ३ ॥ दध्यन्नं दापयेत्पथ्यं तृषार्ते शीतलं जलं । सन्निपातं निहंत्याशु स्रोयं पाणिवटी रसः॥४॥इतिरसः॥

## अथ प्रलापीचिकित्सा ॥

प्रलापः कंपचित्तार्तः प्रज्ञानाशोतितापवान् । पादशोफांगपीडा च विकलः प्रतिवादनं ॥५॥ ज्ञेयः प्रलापकश्चिन्हैः सन्निपातोतिदारुणं । तस्य चतुर्द्दशाहानि संख्या साध्यस्य प्रोदिता ॥ ६ ॥ शतावरीमूलरसो प्रलापं मधुना जयेत् । रसोनत्रिकटुफांट मधुना च तथाविधः ॥ ॥ १०७ ॥ तगरतुरगगंधापर्पटीशंखपुष्पी त्रिदशविटपतिक्ताभारतीभूतकेशी । जलधरकृतमालश्वेतकींगोस्तनीभ्यां अपहरति कषायस्तीक्ष्णयुक्तः प्रलापं ॥ ८ ॥ दशमूलाब्दशुठीनां हिमो हंति प्रलापकं । लवंगतीक्ष्णकल्कस्तु शुंठीक्काथेन तद्विधः ॥ ९ ॥ एलातीक्ष्णलवंगाब्दहिंगुतगरसंभवं । चूर्णं प्रलापकं हंति दशमूलशृतेन च ॥ १० ॥ शुद्धसूतं द्विधागंधं शिला च विषहिंगुलं । मृतकांताभ्रताम्रायस्तालकं माक्षिकं समं ॥ ११ ॥ अम्लवेतसजंबीरचांगेरीणां रसेन च । निर्गुंड्याहस्तिशुंठी च द्रवैर्मर्द्यं दिनद्वयं ॥ १२ ॥ रुध्वा च भूधरे पक्का दिनांते तं समुद्धरेत् । चित्रकस्य कषायेण मर्द्दयेत् प्रहरद्वयं ॥ ११३ ॥ माषमात्रं प्रदातव्यो हिंगुव्योषार्द्रकद्रवैः । सकर्पूरान्नपानं स्यान्मृतोत्थापनको रसः ॥ १४ ॥ पीडितः सन्निपातेन गतोवापि यमालयं । तत्क्षणात् जीवते सत्यं पथ्यं क्षीरं प्रयोजयेत् ॥ १५ ॥ इतिरसः ॥

## अथ जिव्हकचिकित्सा ॥

सकंटाकठिनाजिव्हा कासश्वासातिविव्हलः । मूको बधिरता तापो बलहानीति लक्षणैः ॥ १६ ॥ जिव्हकः सन्निपातोयं कष्टसाध्यं तु लक्षयेत् । जातीप्रवालस्वरसो मधुना जिव्हकं जयेत् ॥ १७॥ सुरतरुकटुनिंबैरक्षपथ्यापटोली रजनियुगुलविश्वासिंहिकाश्रीफलेभ्यः । सलिलघनगुडूचीखादिरैःसार्द्धमेभिः प्रशमयतिकषायो जिव्हकं कष्ट-

साध्यं ॥ १८ ॥ वचाभूनिंबब्राह्मीणां फांटो मधयुतो हरेत् । जिव्हकं च तथा रास्नाभार्गी शुंठीसटीहिमः ॥ १९ ॥ विषत्रिकटुकल्कस्तु मधुनाजिव्हकं जयेत् । तथा पंचपटुक्षारव्योषचूर्णं तु मस्तुना ॥ २० ॥ शुद्धसूतं बलिं चाभ्रं मर्यमार्द्रकजैर्दिनं । वीरभद्ररसः ख्यातो मापैकं सन्निपातजित् ॥ २१ ॥ चित्रकार्द्रकसिंभूत्थमनुपेयं जलैः सह । पथ्यं क्षीरोदनं देयं द्विवारं च रसोहितः ॥ २२ ॥ इतिरसः ॥

## अथ अभिन्यासचिकित्सा ॥

यस्तु संधिग्रहादीनां सर्वेलिंगैः समायुतः । विशेषाद्दाहमोहाद्याः सोभिन्यासोतिदुःसहः ॥ २३ ॥ भृंगराजरसो हंति शुंठीरामठसंयुतः । अभिन्यासं तथा फांटो भूनिंबकटुकोद्भवः ॥ २४ ॥ त्रायंतीदशमूलपुष्करजटावातारिभिः कारवीभार्गीस्यादमृताटरूषकसटीगोमूत्रसंयोजितः । शृंगीवासपुनर्नवाभिरचितो युक्तः कषायो हरेत् सोभिन्यासगदं कफज्वरयुतं निःसंशयं पानतः ॥ १२५ ॥ सिंहिकाश्रीफलःफांटो गोमूत्रेण हरेत्तथा । अभिन्यांसं वचानिंबभूनिंबपुष्करैर्हिमः ॥ १२६ ॥ केसरं मातुलिंगस्य मधुसैंधवसंयुतं । जिव्हातालुगलक्लोमसोष्मूर्धि प्रदापयेत् ॥ २७ ॥ करवीरस्य पुष्पाणि चंदनं सारिवातिलाः । तृष्णायां शिरसि लेप आरनालेन पेषितः ॥ २८ ॥ लशुनमरिचकृष्णामाणिमंथाग्रगंधा शुकतरुफलबीजैराजिगोमूत्रपिष्टैः । कफपवनविकारे सत्वसंज्ञाप्रबोधं निगदितगदवद्भिर्नेत्रयो रंजनं स्यात् ॥ २९ ॥ इतित्रयोदशसन्निपातचिकित्सा ॥

## अथागंतुकज्वरचिकित्सा ॥

अभिचारग्रहावेशशापैरागंतुकस्त्रिधा । श्रमाच्छेदात्तथा दाहाच्चतुर्धागंतुजो ज्वरः ॥ ३० ॥ कामाद्भीतेः शुचेरोषाद्विषादौषधगंधतः ॥ एवमागंतुकज्वरस्त्रयोदशविधः स्मृतः ॥ १३१ ॥ ब्राह्मीकूष्मांडषड्ग्रंथीशंखिनीस्वरसाः पृथक् । मधुकुष्ठयुताः पीतः सर्वोन्मादापहारिणः ॥ ३२ ॥ पथ्याद्राक्षाब्दभूनिंबहिमारुणमहौषधैः । आगंतुकज्वरो हंति कृतः क्वाथः समाक्षिकः ॥ ३३ ॥ द्राक्षालाजांबुफांटस्तु आगंतुकज्वरापहं । त्रिफलासारिवाहिमः सतीक्ष्णश्च तथाविधः ॥ ३४ ॥ अंकोलमूलकल्कस्तु मधुना विषहा स्मृतः । चातुर्जातकभूनिंबचूर्णं

च मधुना तथा ॥ ३५ ॥ चातुर्जातागरुव्योंषभूनिंबदारुभिः कृता । गुडेन गुटिका हन्यादागंतुकज्वरान् भुवि ॥ ३६ ॥ पथ्या प्रस्थं राजवृक्षामृताक्षसिंहास्याग्नीकंटकार्यामलानि । प्रत्येकं स्यात् मानिका रेचनी च पक्तव्यं तत् द्रोणमात्रे जले तु ॥ १३७ ॥ पूते तस्मात् कंसमात्रे गुडेस्य दद्यात्कंसे प्रस्थयुग्मं तथैव । लेहं कृत्वाऽकल्करत्न्यूषणैला प्रत्येकं स्यात् कुड्वमात्रं विचूर्ण्य ॥ ३८ ॥ आज्यं कूची तत्र निक्षिप्य लेहेत् हन्यादेतत् श्वासकासज्वरांश्च । आगंतुकान्विद्रधिश्लेष्मशोफान् पांडूनर्शः विड्विबंधक्षयं च ॥ ३९ ॥ इतिअवलेहः ॥ रक्तोत्पला रक्तो दंती वचा कुष्ठाब्दपद्मकं । वरी यष्टी निशौ व्याघ्यौ त्रिफला तगरचंदनं ॥ ४० ॥ अजमोदाश्वगंधैला तिक्तादारुजिरोत्पलं । द्राक्षा च रामठं कल्कैरेतैर्दुग्धेन पाचितं ॥ ४१ ॥ घृतं शुक्रार्त्तवं दोषं आगंतुकज्वरं विषं । फलाज्यं हंति योग्यं च बालवृद्धेषु च त्रिषु ॥ ४२ ॥ ॥ इतिफलाज्यं ॥ मूर्वानिशागदारुणालाक्षास्वर्जिककल्कितं । शुंठीक्वाथे शृतं तैलमभ्यंगात् ज्वरशीतनुत् ॥ ४३ ॥ गोमूत्रपिष्टं त्रिकटु हन्यात् स्थावरजंगमं । विषं च जडतां शीतं नस्यतो भूतजां रुजं ॥ १४४ ॥ शिरीषबीजगोमूत्रकृष्णामरिचसैंधवं । अंजनं स्यात्प्रबोधाय सरसोनशिलावचैः ॥ ४५ ॥ इतिश्री शामदत्तविरचिते योगेश्वरे सन्निपातज्वरचिकित्सानामः षष्ठः परिच्छेदः ॥ ६ ॥

## अथातीसारचिकित्सा ॥

पृथग्दोषैस्त्रिधासर्वैः शोकादामाद्भयादपि । अतिसारः सप्तधास्याचिकित्सैषां च प्रोच्यते ॥ १ ॥ जंब्वाम्रामलकीनां च पल्लवोत्थो रसो जयेत् । मध्वाज्यक्षीरसंयुक्तो रक्तातीसारमुल्बणं ॥ २ ॥ स्थूलबब्बूलिकापत्ररसःपानाद् व्यपोहति । सर्वातिसारान् श्योनाककुटजत्वग्रसोथवा ॥ ३ ॥ बीजपूराम्रजंबूनां पल्लवानि जटाः पृथक् । पुटपाकेन विपचेत् क्षौद्रयुक्तो हि तद्रसः ॥ ४ ॥ नंदिनीवारयेत् घोरं सर्वदोषसमुद्भवं । अरलुत्वक्कृतरसः पुटेन मधुना तथा ॥ ५ ॥ गुडूचीधान्यकोशीरशुंठीवालुकपर्पटैः । बिल्वप्रतिविषावासरक्तचंदनवत्सकैः ॥ ६ ॥ किरातमुस्तेंद्रयवैः क्वथितं शिशिरं पिबेत् । सक्षौद्रं रक्तपित्तघ्नं ज्वरातीसारनाशनं ॥ ७ ॥ नागरं कुटजो मुस्तममृतातिविषातथा । एभिः

कृतं पिबेत्क्वाथंज्वरातीसारनाशनं ॥ ८ ॥ आम्रजंबूवटांकुरोशीरफांटो मधुयुतः । पिपासाछर्द्यतीसारान्मूर्च्छां जयति दुस्तरां ॥९॥ बदरीमूलकल्केन तिलकल्कश्च योजितः । मधुक्षीरयुतः कुर्याद्रक्तातीसारनाशनं ॥ १० ॥ धातकींद्रयवारोध्रः बिल्वमोचरसाब्दजं । गुडतक्रयुतं चूर्णं पिबेत्सर्वातिसारि च ॥ ११ ॥ मुस्तारलुकशुंठीभिर्धातकीलोध्रवालकैः । बिल्वमोचरसाभ्यां च पाठेंद्रयववत्सकैः ॥ १२ ॥ आम्रबीजप्रतिविषालज्जालुरिति चूर्णितैः । क्षौद्रतंदुलपानीयैर्पीतैर्याति प्रवाहिका ॥ १३ ॥ कुटजत्वक्तुलामाद्रां द्रोणनीरे विपाचयेत् । पादशेषं शृतं नीत्वा चूर्णानेतानि दापयेत् ॥ १४ ॥ लज्जालु धातकी बिल्वं पाठां मोचरसस्तथा । मुस्ता प्रतिविषा चैव प्रत्येकं स्यात्पलं पलं ॥ १५ ॥ ततस्तु विपचेद्भूयो यावद्दर्वीप्रलेपनं । तैलेन छागदुग्धेन पीतो मंडेन वा जयेत् ॥ १६ ॥ सर्वातिसारान् घोरांस्तु नानावर्णान्सवेदनान् । असृग्दरं समस्तं च सर्वार्शांसि प्रवाहिकां ॥ १७ ॥ इति कुटजपाकः ॥ मसूराणां पलशतं जलद्रोणे विपाचयेत् । पादशेषं शृतं नीत्वा दत्वा बिल्वपलाष्टकं ॥ १८ ॥ घृतप्रस्थं पचेत्तेन सर्वातीसारनाशनं । ग्रहणी भिन्नविट्कं च नाशयेच्च प्रवाहिकां ॥ १९ ॥ मसूराद्यं घृतं ॥ दरदं वत्सनागं च मरिचं टंकणं कणा । चूर्णयेत्समभागं च रसो ह्यानंदभैरवः ॥ २० ॥ गुंजैका च द्विगुंजास्य त्रिदोषोत्थातिसारजित् । कुटजत्वक्पलं चानु लिह्याच्च मधुना तथा ॥ २१ ॥ दध्यन्नं दापयेत्पथ्यं गव्याजं तक्रमेव वा पिपासायां जलं शीतं विजया सहिता निशि ॥ २२ ॥

## अथामातीसारचिकित्सा ॥

एरंडतैलसंयुक्ताश्चार्द्रकस्वरसो जयेत् । पार्श्वहृद्बस्तिशूलानि कोष्ठवातं च दारुणं ॥ २३ ॥ पुटपाकेन विपचेत्सुपक्वं दाडिमीफलं । तद्रसो मधुसंयुक्तस्त्वामवातस्यनाशनः ॥ २४ ॥ धान्यवालुकबिल्वाब्दनागरैः साधितं जलं । आमशूलहरं ग्राही दीपनं पाचनं परं ॥ २५ ॥ एरंडतैलसंयुक्तः शुंठीक्वाथोहरेत्तथा । दशमूलशृतः साज्य आमातीसारमुल्बणं ॥ २६ ॥ शुंठी तिलगुडैः कल्को दुग्धेन सह भक्षितः । परिणामभवं शूलमामवातं च नाशयेत् ॥ २७ ॥ शुंठीप्रतिविषाहिंगुमुस्ता-

कुटजचित्रकैः । चूर्णमुष्णांबुना पीतमामातीसारनाशनं ॥ २८ ॥ शुद्ध-लोहभवं चूर्णं पातालगरुडे रसैः । मर्द्दयित्वा पुटेद्वन्हौ दद्यादेव पुटत्रयं ॥ २९ ॥ पुटत्रयं कुमार्याश्च कुठेरच्छिन्नकारसैः । पुटषट्कं ततो दद्या-देवं तीक्ष्णमृतिर्भवेत् ॥ ३० ॥ आमवातं गरं पांडुमेहशोफं हलीमकः । हन्याल्लोहं यथायोग्यमनुपानं च पाययेत् ॥ ३१ ॥ इति लोहमारणं ॥

## अथ ग्रहणीचिकित्सा ॥

पृथक्दोषैः सन्निपातात्तथा सामेन पंचमी । एवं पंचविधा प्रोक्ता ग्रहणी च भिषग्वरैः ॥ ३२ ॥ अरलुत्वग्रसो हंति मधुना ग्रहणीं तथा । रुचकाग्निमरीचानां फांटस्तक्रेण सेवितः ॥ ३३ ॥ द्विपर्णातिविषाशुंठी बालबिल्वाब्दधान्यकैः । कृतं सेव्ययवानीभिः शुंठयासर्पिर्युतस्तथा ॥ ३४ ॥ रुचकाग्निमरीचानां चूर्णं तक्रेण सेवितं । ग्रहण्यूदरगुल्मार्शः क्षुण्णाद्यप्लीहनाशनं ॥ ३५ ॥ बालबिल्वस्य गुटिका गुडेन ग्रहणीं जयेत् । शुंठीकल्कः शृतैः पक्कं घृतं ग्रहणिवातजित् ॥ ३६ ॥ दुग्धधत्तूरबीजानि तच्चूर्णं ग्रहणीं जयेत् । गोतक्रेण च दध्ना वा तथा सरलसंभवं ॥ ३७ ॥ इति शामदत्तविरचितं योगेश्वरे ग्रहणीप्रतिकारो नाम सप्तमः परिच्छेदः ॥ ७ ॥

## अथ प्रदरचिकित्सा ॥

वातपित्तकफैस्त्रिधा चतुर्थं सन्निपाततः । प्रदरं चतुर्धा प्रोक्तं त्वनृतौ यद्दयोस्त्रियः ॥ १ ॥ हरिद्रास्वरसो हंति क्षौद्रेण प्रदरं तथा । भूनिंब-निंबगुडूचीफांटश्च मधुना हरेत् ॥ २ ॥ रसांजनाब्दभल्लातदार्वीश्री-वृषतिक्तकैः । क्वाथः समाक्षिको हन्यात् प्रदरं सर्वसंभवं ॥ ३ ॥ तंदुलीयांघ्रिरसजः कल्कः क्षौद्रेण संयुतः । तंदुलोदकपीतस्तु प्रदरं विविधं हरेत् ॥ ४ ॥ भूनिंबागरुपथ्यात्वग्दार्वीजातिफलोद्भवां । चूर्णं माहिषदुग्धेन पीतं प्रदरनाशनं ॥ ५ ॥ रसजैलानिशापथ्यादारुभिर्गुटिका कृता । सिताक्षौद्रयुता हंति प्रदरं प्रदरामयं ॥ ६ ॥ सहाचरे द्वे त्रिफला गुडूची सपुनर्नवा । शुकनासा हरिद्रे द्वे रास्ना मेदा शतावरी ॥७॥ कल्कीकृत्य घृतप्रस्थं पचेत् क्षीरे चतुर्गुणे । तत्सिद्धं पाययेन्नारी योनिदोषनिपीडितां ॥ ८ ॥

## अथ प्रमेहचिकित्सा ॥

चत्वारो वातजाः पित्तात् षट् च श्लेष्मोद्भवाद्दश । एवं विंशति मेहा स्यु रसाख्या वातजा मता ॥ ९ ॥ अमृतायारसः क्षौद्रयुतं सर्व प्रमेहनुत् । हरिद्राचूर्णयुक्तो वा रसो धात्र्याः समाक्षिकः ॥ १० ॥ क्वाथो विशाला त्रिफला मुस्ता दार्वीनिशोद्भवः । निशाकल्को मधुमिश्रो हंति मेहांश्च विंशतिः ॥११॥ खदिराग्र्यानिशाफांटः प्रमेहंमधुना जयेत् । पाठाऽरग्वधदारुणां हिमः सशर्करस्तथा॥१२॥शिवाक्काथेन सपीतो निशाकल्को हरेद् ध्रुवं । प्रमेहं मधुना तद्वत् शुंठीगोक्षुरजस्तथा ॥ १३ ॥ लवंगवालकर्पूरमेलात्वक्पत्रकेसरं । जातीफलहिमोशीरं नागरं कृष्णजीरकं ॥ १४ ॥ तुलागरु च कंकोलं मांसी नीलोत्पलं कणा । तगरं सर्वचूर्णार्द्धा सितायोज्या भिषग्वरैः ॥ १५ ॥ लवंगाद्यमिदं चूर्णं वृष्यं हृद्यं बलप्रदं । हृद्रोगं कंठरोगं च कासं हिक्कां च पीनसं ॥ १६ ॥ यक्ष्माणं तमकश्वासमतिसारमुरक्षतं । प्रमेहारुचिगुल्मादीन् ग्रहणीमपि नाशयेत् ॥ १७ ॥ इति लवंगादिचूर्णं ॥ त्रिपलं त्रिफलाचूर्णं कृष्णाचूर्णं पलोन्मितं । गुग्गुलुः पंचपलिकः क्षोदयेत्सर्वमेकतः ॥ १८ ॥ शाणप्रमाणस्य गुटी हन्यात् मेहं भगंदरं । वातरक्तं च गुल्मं च प्रदरं कुष्ठमेव च ॥ १९ ॥ दशमूलाढकं नीरद्रोणे पत्का शृतं नयेत् । पूतेस्मिन् पादशिष्टे च पथ्याप्रस्थस्य चूर्णकं ॥ ॥ २० ॥ गुडप्रस्थद्वयं क्षिप्त्वा पाल्वयेत्तच्छनैः शनैः । व्योषत्रिजातयवजकर्षांशं तत्र निक्षिपेत् ॥ २१ ॥ शीते मध्वंजलिं क्षिप्त्वा लेहो हन्याद्विवर्णतां । गुल्मारुचीमेहशोफान् श्वासशुक्रामयान् ज्वरान् ॥ ॥ २२ ॥ शुद्धौ समौ रसबलिर्धूर्त्तबीजं च तत्समं । धत्तूरबीजतैलेन दिनं मर्द्येत् प्रयत्नतः ॥ २३ ॥ वल्लयुग्मं सितासार्द्धं प्रमेहं प्रदरं हरेत् । मेहबद्धो रसो नाम्ना वीर्यबंधे परो मतः ॥ २४ ॥ इति रसः ॥ क्षिपेद्वादशमांशेन दरदं तीक्ष्णचूर्णतः । मर्द्दयेत्कन्यकाद्रावैर्यामयुग्मं ततः पुटेत् ॥ २५ ॥ एवं सप्तपुटैर्मृत्युर्लोहचूर्णं अवाप्नुयात् । पांडुशोफप्रमेहार्शगूलमेदोगरापहं ॥ २६ ॥ इति लोहविधिः ॥

## अथार्शचिकित्सा ॥

अर्शांसि षट्विधान्याहुर्वातपित्तकफास्रतः । संनिपाताच्च संसर्गाच्चे-

षां भेदात्रिधा स्मृताः ॥ २७ ॥ सौरणं कंदमादाय पुटपाकेन पाचये-
त् । सतैललवणस्तस्य रसश्चाशो विकारनुत् ॥ २८ ॥ पिप्पलीदाडि-
मीबीजपथ्याशुंठीभवः शृतः । अर्शांसि मधुना हंति तथा पीडां तदु-
द्भवां ॥ २९ ॥ लशूनकल्कं तैलेन नागकेसरजस्तथा । सक्षौद्रनवनीत-
स्तु हंति सर्वार्शजां रुजं॥३०॥अपामार्गस्य बीजानां कल्कस्तंडुलवारि-
णा । पातो रक्तार्शसां नाशं कुरुते नात्रसंशयः ॥ ३१ ॥ हपुषा त्रिफ-
ला चैव त्रायमाणं च पिप्पली । हेमक्षीरी त्रिवृच्चैव सातला कटुका वचा
॥३२॥नीलिनी सैंधवं कृष्णा लवणं चेति चूर्णयेत् । उष्णोदकेन मूत्रेण
दाडिमीत्रिफलारसैः ॥ ३३ ॥ अजीर्णप्लीहगुल्मेषु शोफार्शो विषमा-
ग्निषु । हलीमकामलापांडुकुष्ठाध्मानोदरेषु च ॥ ३४ ॥ पथ्याशुंठ्यौ
दशपले चत्वारी चित्रकस्य च । चव्यकत्रीणि ग्रंथेर्द्वे त्वरुष्करपलाष्ट-
कं ॥ ३५ ॥ जीरकोषणकृष्णानां त्रीणि सूरणषोडश । चूर्णं सूक्ष्मं
विचूर्ण्याथ सर्वद्विगुणितो गुडः ॥ ३६ ॥ कृतास्य गुटिका हंति सर्वा-
ण्यर्शांसि भक्षणात् । कांकायनेति विख्याता सर्वोपद्रवहारिणी ॥३७॥
इति कांकायनी गुटी ॥ सूरणस्य तुला नीरे द्रोणे पक्वार्द्ध शोषितं ।
ग्राह्यं च तानि खंडानि पीडयेद् दृढवाससा ॥ ३८ ॥ क्षिप्त्वाताम्रकटा-
हे च दद्यादष्टपलं घृतं । तेन किंचित् भर्जयित्वा पूर्वाक्त तज्जल क्षि-
पेत् ॥ ३९ ॥ खंडात्पलशतं दत्वा सर्वमेकत्र पाचयेत् । सुपक्वे पिप्पली
शुंठीजीराणां द्विपलं पृथक् ॥ ४० ॥ पृथक्पलार्द्धं धान्याकं पत्रैला
मरिचं त्वचः । चूर्णीकृत्य क्षिपेत्तत्र घृतार्द्धं क्षौद्रमावपेत् ॥ ४१ ॥
अर्शसां मूढवातानां मंदाग्नीनां च शस्यते । सूरणस्योग्रपाको हि हंति
रोगान् गुदोद्भवान् ॥ ४२ ॥ इति सूरणपाकः ॥ पिप्पली पिप्पलीमूलं
चित्रको हस्तिपिप्पली । श्वदंष्ट्रा नागरं धान्यं पाठा धान्ययवानिका
॥ ४३ ॥ द्रव्यैश्च पालिकैरेतैश्चतुःषष्टिपलं घृतं । घृताच्चतुर्गुणं दद्याच्चां-
गेरीस्वरसं बुधः ॥ ४४ ॥ तथा चतुर्गुणं दत्वा दधिसर्पिर्विपाचयेत् ।
शनैः शनैर्विपक्वं च चांगेरीघृतमुत्तमं ॥ ४५ ॥ तत् घृतं कफवातघ्नं
ग्रहण्यर्शोविकारनुत् । हंत्यानाहगुदभ्रंशोमूत्रकृछ्रप्रवाहिकां ॥ ४६ ॥
इति चांगेरीघृतं ॥ धूमश्चित्रकसंभूतस्त्वर्शसां नाशनः स्मृतः ।
शमीत्वग्भस्मलेपस्तु कारंजेन कृतस्तथा ॥ ४७ ॥

## अथ कृमिचिकित्सा ॥

काकमाच्या रसो हंति ह्येरंडतैलमिश्रितः । कृमीन् द्विमार्गगान् हंति रोगान् तदुद्भवांस्तथा ॥ ४८ ॥ फलाखुकर्णीदार्व्यब्दशिग्रुक्काथः कवोष्णकः । कृष्णाविडंगकल्कश्च कृमीन् हंति द्विमार्गगान् ॥ ४९ ॥ कृमिहराजमात्फांटः कृमिश्च हिंगुनाजयेत् । हिंगुसंचलशुंठीनां कल्कस्तक्रयुतस्तथा ॥ ५० ॥ खदिरेंद्रयवारिष्टत्रिकटुत्रिफलावचैः । सत्रिवृद्भिर्हरेत् चूर्णं कृमीन् गोमूत्रसंयुतं ॥ ५१ ॥ हिंगुशुंठीत्रिवृद्दारुविडंगपिप्पलीगुटी । गोमूत्रेण कृता हंति कृमिस्तक्रानुपानतः ॥ ५२ ॥

## अथ मूत्रकृच्छ्रचिकित्सा ॥

वातपित्तकफास्त्रीभिः शुक्रकृच्छ्रं च पंचमं । विट्कृच्छ्रं घातकृच्छ्रं च चाश्मरीकृच्छ्रमष्टमं ॥५३ ॥ इत्यष्टमूत्रकृच्छ्राणि चतुर्धा चाश्मरी मता । वातात्पित्तात्कफाच्छुक्रादेवं चतुर्विधा मता ॥ ५४ ॥ एलाश्मभेदोरुबुकाश्वदंष्ट्राकौंतीमधूवासकपिप्पलीनां । सशर्करः साश्मजतुश्रृतश्च निहंति कृच्छ्राणि तथाश्मरीं च ॥५५॥ शिवाश्मभेदकाशांघ्रिकुशदुःस्पर्शगोक्षुरैः । हिमक्षौद्रसितायुक्तो मूत्रकृच्छ्राश्मरीं हरेत् ॥ ५६ ॥ रेवंचिन्याश्च कल्कस्तु शर्करासहितो हरेत् । अश्मरीं मूत्रकृच्छ्रं च सरुग्दाहं सवेदनां ॥ ५७ ॥ एलाशिलाजतुकृष्णोश्मभेदसंभवं रजः । तंदुलोदकसंपीतं मूत्रकृच्छ्राश्मरीं जयेत् ॥ ५८ ॥ भूनिंबदारुत्रिफलाविडंगसुवर्णमाक्षीरजनीद्विव्योषं । विषाभिधान्याचविकेभकृष्णाद्विक्षारपंचपटुग्रंथिकं च ॥ ॥ ५९ ॥ टंकं पृथक् दंतित्रिवृत्त्रिजातं वंशं पृथक्कर्षमिदं च लोहं । शुक्त्याः पलाभ्रं द्विपलं शिलाजतोः पुरद्विमुष्टिर्गुटिकात्विमैः कृताः ॥ ॥ ६० ॥ चंद्रप्रभा हंति समस्तमेहं समस्तकृच्छ्राश्मरिसूत्रघातं । विबंधमानाहशूलानिकासं श्वासांत्रवृध्द्यूदरपांडुगुल्मं ॥ ६१ ॥ इति चंद्रप्रभागुटी ॥ तुलार्द्धं देवदारुस्याद्वासा च पलविंशतिः । मंजिष्ठेंद्रयवा दंती नागरं रजनीद्वयं ॥ ६२ ॥ रास्नाकृमिघ्नं मुस्तं च शिरीषं खदिरार्जुनौ । भागान् दशपलान् दद्यायवान्या वत्सकस्य च ॥ ६३ ॥ चंदनस्य गुडूच्याश्च रोहिण्याश्चित्रकस्य च । भागानष्टपलानेषामष्टद्रोणेंभसः पचेत् ॥ ६४ ॥ द्रोणशेषे कषाये च पूते शीते प्रदापयेत् । धातुक्याः षोडशपलं माक्षिकस्य पलत्रयं ॥ ६५ ॥ व्योषस्य द्विपलं

दद्यात् त्रिजातस्य चतुःपलं । चतुःपलं प्रियंगुश्च द्विपलं नागकेसरं ॥ ॥ ६६ ॥ सर्वाण्येतानि संचूर्ण्य घृतभांडे निधापयेत् । आसवो देवदार्व्यादि दद्रूकुष्ठविनाशनः ॥ ६८ ॥ इति देवदार्व्यादिआसवः ॥ त्रिफलाक्काथगोमूत्रक्षौद्रक्षारसमाहितः । बस्तिना योजयेद्विद्वान् विट्कृच्छ्रं च नाशयेत् ॥ ६९ ॥ पक्का किंशुकपुष्पाणि जले कोष्णानि बंधनात् । मूत्रकृच्छ्रं निहंत्याशु मूत्रबंधं तथाश्मरीं ॥ ७० ॥ मलापहत्रिवृद्दंतिशुंठ्यंगुष्ठनिभां गुटीं । घृताभ्यक्ते गुदे क्षिप्त्वा विबंधानाहकृच्छ्रजित् ॥ ७१ ॥ यवस्वर्जिकक्षारौ च जले पिष्ट्वेंद्रिरंध्रके । विमुक्तौ हंति मूत्रार्तिं मूत्रकृच्छ्रं विबंधतां ॥ ७२ ॥ इति श्रीशामदत्तविरचिते योगेश्वरे अतिसारादिचिकित्सा नाम अष्टमः परिच्छेदः ॥ ८ ॥

## अथ श्वासकासचिकित्सा ॥

कासाः पंचमलैस्त्रीभिः क्षतादुरसि संक्षयात् । धातोश्च पंचमः पंच क्षयात् दोषैः पृथक्त्रयः ॥ १ ॥ उरःक्षतात् सन्निपातात् श्वासाः पंच तथा मताः । क्षुद्रस्तमकऊर्ध्वश्च महाछिन्नश्च पंचमः ॥ २ ॥ आर्द्रकस्वरसः क्षौद्रयुतः श्वासकफापहः । वासापत्ररसो तद्वन्मधुना श्वासकासजित् ॥ ३ ॥ पचेत् क्षौद्रीं सपंचांगां पुटपाकेन तद्रसः । पिप्पलीचूर्णसंयुक्तः कासश्वासक्षयापहः ॥ २ ॥ वासाकृष्णामृताभार्गी निशाक्षुद्राब्दनागरैः । क्काथो मरिचसंमिश्रः कासश्वासक्षयापहः ॥ ३ ॥ शुंठीक्काथे मधुयुतः पीनसश्वासकासजित् । शुंठीभार्ग्युद्भवः क्काथः श्वासं कासं तथा जयेत् ॥ ४ ॥ बिल्वकाश्मर्यतर्कारीटिंटुपाटलजः शृतः । कासश्वासहरः सिंहीक्काथश्च सकणस्तथा ॥५॥ गुडसर्पिर्युतो हंति व्योषकल्कः कफामयान् । कटुतैलेन संयुक्तो गुडः श्वासहरो भवेत् ॥ ६ ॥ मधुखंडयुतः कल्को मरिचसंभवो भवेत् । श्वासकासहरः कल्कः खदिरसंभवस्तथा ॥ ७ ॥ शुंठीकृष्णाक्षग्रंथीनां चूर्णं क्षौद्रयुतं हरेत् । कासश्वासं तथा व्योषत्रिफलादारुवेल्लजं ॥ ८ ॥ कट्फलाब्दवचाभार्गीयासशृंगीरजस्तृणैः । सपथ्यादारुभिश्चूर्णं मधुना श्वासकासजित् ॥९॥ लवंगमरिचाक्षाणां तुल्यं खदिरसंभवां । बब्बुलस्य कषायेण गुटी कासहरा मुखे ॥ १० ॥ पथ्यानागरमुस्तानां गुडेन गुटिका कृता । मुखे घृता निहंत्याशु श्वासं च प्रबलं कफं ॥ ११ ॥

चित्रं जटा धात्र्यमृता दशांघ्रितुला जले द्रोणमिते विपाच्यः । पादावशिष्टे क्वथनेभयानां प्रस्थं क्षिपेत्प्रस्थगुडं पुनः पचेत् ॥ १२ ॥ शीते मधूनः कुडवं त्रिजातं व्योषं पृथक् सार्द्धपलं यवाग्रं । कर्षं हरेच्छ्वासबलासकासशोफप्रतिश्यायाग्निविकारशोफान् ॥ १३ ॥ इति चित्रहरीतक्यवलेहः॥ रोही तदंती त्रिवृतेंद्रवारुणी शिग्रूवरीपुष्करकुष्ठकारिरैः । वरूणरास्नासहितैस्तुलां पचेत् द्रोणे जले पादमिते पुनः पचेत्॥१४॥ तस्मिन् क्षिपेन्निंबुरसद्विप्रस्थं गोसर्पिप्रस्थं दधिप्रस्थयुग्मं । ग्रंथी वचा हिंगुरसोनपथ्याव्योषं सठीपंच च षट् निपुष्करं ॥ १५ ॥ क्षारद्वयं कल्कित सर्वमंजलिं क्षिप्त्वा शनैर्निंबुवृतं च पक्वं । हन्यात्कफं गुल्मशूलोर्ध्वरोगान् छर्दिर्विषूचीःश्वसनोर्ध्ववातं ॥ १६ ॥ इति निंबुघृतं ॥ शुद्धौ समौ रसबली च तयोर्द्विभागं चूर्णं कपर्दिकभवं द्विगुणं च तद्वत् । शंखस्य टंकणभवं रसराजपादमेकत्र धेनुपयसा दिनमेव मर्द्यं ॥ ॥ १७ ॥ चूर्णावलिप्तपुटमध्यसमर्पितं तत् मृद्वस्त्रमुद्रितमिदं विपचेच्च गर्त्ते । हस्तोन्मिते शिशिरतांगमिते च लोकनाथः पुनर्निगदितो रसमर्दितश्च ॥ १८ ॥ अस्य मासमितं चूर्णमेकोनत्रिंशदूषणैः । घृतेन वातजे दद्यान्नवनीतेन पैत्तिके ॥ १९ ॥ क्षौद्रेण श्लेष्मजे दद्यादतिसारे क्षये तथा । अरुचौ ग्रहणीरोगे कार्श्ये मंदानले तथा ॥ २० ॥ कासश्वासेषु गुल्मेषु लोकनाथरसो हितः । तस्योपरि घृतान्नं च भुंजीत कवलप्रियं ॥ २१ ॥ इति लोकनाथरसः ॥

## अथाग्निमांद्याजीर्णचिकित्सा ॥

वातजो विषमस्तीक्ष्णः पित्तान्मंदः कफादिति । भस्मको वातपित्ताभ्यां विकाराश्चाग्निसंभवाः ॥ १ ॥ वातपित्तकफैस्त्रेधा चतुर्थः सन्निपाततः । पंचमश्चमनस्तापादरोचकमता इति ॥ २ ॥ सैंधवः शृंगबेराभ्यां पीतो निंबुरसस्तथा । बीजपूररसक्षौद्रक्षारयुक्तोग्निमांद्यनुत ॥ ॥ २२ ॥ पथ्याशुंठीकटूमुस्ताशम्याकग्रंथिकशृतः । हंतिसौवर्चलोपेतं मंदाग्निं मारुतं कफं ॥ २३ ॥ कणाहरीतकीशुंठीमिश्रेयासैंधवैस्तथा । पथ्यासैंधवशुंठीभिः कल्को दीपनपाचनः ॥ २४ ॥ हिंगुव्योषाजमोदाद्विजीरसैंधवचूर्णकं । भक्षणात्साज्यभक्तं च परं रुचिकरं मतं ॥२५॥ वृक्षोम्लत्रिकटूपथ्याकटुकाम्लाग्निजंतुजित् । दीप्यौ सौवर्चलं जीरे चूर्णं मंदाग्निवातजित् ॥ २६ ॥ कृष्णाशुंठीकरंजाग्निपथ्याक्रमिहरैः कृता ।

गुटी शर्करया हंति मंदाग्निमरुचिं तथा ॥ २७ ॥ त्रिकटुत्रिफलाहिंगुयवानीसैंधवोद्भवा । गुडेन गुटिका कुर्याद्रुचिवन्हिप्रसन्नतां ॥ २७ ॥ विडंगं त्रिफलाशुंठी वचा कृष्णामृता विषं । भल्लातं समभागानि गोमूत्रेणैव पेषयेत् ॥ २८ ॥ गुंजाभा वटिका कार्या दद्यादार्द्रकजै रसैः । अजीर्णे ऽरुचिविशुच्योः सर्पदष्टे प्रयोजयेत् ॥ २९ ॥ पिप्पलीपिप्पलीमूलचव्याचित्रकनागरैः । ससैंधवोश्वपलिकैर्घृतप्रस्थं विपाचयेत् ३० ॥ क्षीरं चतुर्गुणं दत्वा तद्घृतं प्लीहनाशनं । विषमज्वरमंदाग्निहरं रुचिकरं परं ॥ ३१ ॥ इति षड्बलघृतं ॥ सूतं गंधं विषं शंखं कपर्दी च कणोषणं । चंद्रैकाग्निगजद्वित्रिर्वसुभागैर्विमर्दयेत् ॥ ३२ ॥ जंबीरफेनैर्गुंजैकं हंति वातं विषूचिकां । ज्वरमंदाग्न्यजीर्णानि विण्मूत्रशिरसोग्रहान् । ३३ ॥ इति अग्निकुमाररसः ॥

## अथ पांडुचिकित्सा ॥

वातपित्तकफैस्त्रेधा त्रिदोषैश्च मृद्भक्षणात् । पांडुरोगाश्च पंचैका कामलैकं हलीमकं ॥ ३४ ॥ तुंबीरसस्तीक्ष्णयुतः कामलापांडुरोगजित् । तीक्ष्णकोशातकीफलरसो रेकोद्भवे तथा ॥ ३५ ॥ फलत्रिकामृतातिक्ताकिराततिंबवासकैः । जयेन्मधुयुतः क्वाथः कामलां पांडुतां तथा ॥ ३६ ॥ गोतक्रे निक्षिपेल्लोहं पचेचंद्रार्ककरशिभिः । अहोरात्रेण तत्पीतं कामलापांडुरोगजित् ॥ ३७ ॥ पिप्पलीकल्क मधुना गोक्षीरेण च नागरं । पांडुतां कामलां हंति मंडूरं समधूसुरं ॥ ३८ ॥ त्रिकटुत्रिफलालोहमुस्ताग्निकृमिजिद्भवं । चूर्णं क्षौद्रयुतं शोथकामलापांडुमेहनुत् ॥ ३९ ॥ गोमूत्रे द्वादशगुणे मंडूरमग्निना पचेत् । घनत्वं संगते तस्मिन् लोहार्द्धं चूर्णमापयेत् ॥ ४० ॥ त्रिकटुत्रिफला दार्वी मुस्ताग्नी दारुचित्रकं । विडंगं ग्रंथिकं ताप्यं गुटी तक्रानुपानतः ॥ ४१ ॥ पांडुशोफोदरं हंति ग्रहण्यर्शोहलीमकं । ऊरुस्तंभाग्निसादं च कामलापांडुतां गये ॥ ४२ ॥ प्रस्थार्द्रकरसं प्रस्थगुडमग्नौ च साधयेत् । त्रिजातायोजमोदाब्दजीरधान्यपलं क्षिपेत् ॥ ४३ ॥ लेहो गुल्मं क्षयं हंति पीनसश्वासकासजित् । आर्द्रकस्यावलेहोयं कामलापांडुरोगजित् ॥ ४४ ॥ इति आर्द्रकपाकः ॥ गालयेत्पीठरीमध्ये त्रपुस्तस्मिन् विनिक्षिपेत् । चिंचाश्वत्थत्वग्चूर्णं चतुर्थांशं मुहुर्मुहुः ॥ ४५ ॥ चालयेलोहदर्व्याथ यावद्भस्मत्रपुर्भवेत् । अर्कक्षीरेण तद्भस्ममर्दयेत् घटिकाद्वयं

॥ ४६ ॥ तद्गोलं च पुटे रुध्वा पुटेद्गजपुटेन च । एवं सप्तपुटैर्मृत्युं त्रपु संजायते ध्रुवं ॥ ४७ ॥ त्रपुर्वल्लमितं हंति मधुपिप्पलिसंयुतं । पांडुं हलीमकं शोथ कामलां पवनं कृमिं ॥ ४८ ॥ देवदालीफलरसो नस्यतो हंति कामलां । गिरिमृद्द्राक्षिधात्रीणामंजनं कामलापहं ॥ ४९ ॥

## अथ शोफचिकित्सा ॥

वातपित्तकफैः शोफास्त्रयस्ते समुदाहृताः । निजागंतुकभेदेन जायते ते द्विधा तथा ॥ ५० ॥ आर्द्रकस्वरसो हंति गुडेन शोथजां व्यथां । शीतोदकं च मधुना सर्वशोफविकारनुत् ॥ ५१ ॥ पटोलनिंबवर्षाभूदार्वीपथ्यामृतौषधैः । क्वाथो हन्यात्सकटुभिः स्थौल्यं शोफोदराणि च ॥ ५२ ॥ देवदारूशुंठिकल्को मधुनोदरशोफहा । शोथं किरातशुंठयोस्तु कल्को मधुयुतो हरेत् ॥ ५३ ॥ पुनर्नवामृतादारूपथ्यागुग्गुलुचूर्णकं । गोमूत्रेण हरेत्पांडुं शोफोदरत्वग्रोगजित् ॥ ५४ ॥ कृष्णापाठाहरिद्राग्निव्याघ्रीजीरणग्रंथिकैः । सचव्यकाब्दशुंठीभिः कोष्णकैः शोफहृद्रजः ॥ ५५ ॥ शुंठीदारुत्रिवृत्तिक्तैर्गुडेन गुटिका हरेत् । शोफमेरंडतैलं तु शुंठीक्वाथेन शोफजित् ॥ ५६ ॥ बीजपूरजटासर्पं देवदारुमहौषधं । रास्नाग्निमंथो लेपोयं वातशोथविनाशनः ॥ ५७ ॥ मधूकं चंदनं दूर्वानलमूलं च पद्मकं । उशीरं वालकं पद्मं पित्तशोथे प्रलेपनं ॥ ५८ ॥ कृष्णापुराणपिण्याकशिग्रुत्वक्सिकताशिवा । मूत्रपिष्टः सुखोष्णोयं प्रदेयः श्लेष्मशोथहा ॥ ५९ ॥ निशायुक् चंदनो दूर्वा वर्षाभू पद्मकोशिरं ॥ शिवालोध्रांजनं गैरं लेपस्त्वागंतुशोफहृत् ॥ ६० ॥

## अथ उदरचिकित्सा ॥

वातपित्तकफैस्त्रीणि त्रिदोषेभ्यो जलानपि । प्लीहक्षताद्बद्धगुदादितित्वष्टोदराणि च ॥ ६१ ॥ गिर्णीमूलरसो हंति क्षारेणाष्टोदराणि च । तथोष्ट्रीदुग्धपानेन हन्याद्गुल्मोदराणि च ॥ ६२ ॥ द्रवंतित्रिफला दंतीरोहीतकत्वचशृतः । त्रिकटूयावशूकाढ्यः सर्वोदरहरः स्मृतः ॥ ६३ ॥ स्नुहिक्षीरेण संपीतो कृष्णाकल्कस्तथा जयेत् । गुल्मोदराणि शोफं च पिप्पलीवर्द्धमानकं ॥ ६४ ॥ धान्यात्रया सैंधवकाचसंचलं यवाग्रहिंगुश्च यवानि पुष्करं । समं विडंगं च त्रिवृत्त्रिभागिकमुष्णोदकेनोदरगुल्मजिद्रजः ॥ ६५ ॥ हेमाव्हाकटुकाग्निग्रंथिकत्रिवृत्-

पथ्याहिमाचेतकीशुंठीस्वर्जिकटंकणैर्गुडयुता हन्याद्वटी निर्मिता। आध्मानोदरगुल्मशोथगुदरुग्विण्मूत्ररोधान् कृमीन् मद्योष्णोदकतक्रमस्तुबदरक्काथानुपानं हितं ॥ ६६ ॥ पथ्या शंखिनि सातला कटुत्रिवृत्कंपिल्लदंतीफलं दंती चित्रकदेवदालिकृमिजित्कोशातकी नीलिनी। शम्याको गिरिकर्णि ग्रंथिकवृहद्दारुश्च हेमक्षिरि क्षिप्त्वैषां कुडवं जलाढकमितं स्नुहिक्षीरं षट्बलं ॥ ६७ ॥ अर्कक्षारपलद्वयं च सुरभेः प्रस्थं घृतं पाचयेतदुष्णोदकधेनुदुग्धबदरक्काथोष्ट्रदुग्धैः पिबेत् । आध्मानांतरवृद्धिगुल्मकृमिरुक् शूलानि शोफोदरं बिंदूनामघृतं विरेकविधिना बिंदून्मितं नाशयेत् ॥ ३८ ॥ इति बिंदुघृतं ॥ रोहीतकतुलामेकां चतुर्द्रोणेंभसः पचेत्। पादशेषे शृतैः पूते शीते पलशतद्वयं॥६९॥ दद्याद्गुडस्य धातक्याः पलषोडशिकं मतं ॥ पंचकोलं त्रिजातं च त्रिफलां च विनिक्षिपेत् ॥ ७० ॥ चूर्णयित्वा पलांशेन ततो भांडे निधापयेत् । मासादूर्ध्वं च पिबतां गुदजा यांति संक्षयं ॥ ७१ ॥ ग्रहणीपांडुहृद्रोगप्लीहगुल्मोदराणि च । कुष्ठशोथारुचिहरो रोहितारिष्टसंज्ञितः ॥ ७२ ॥ इति रोहीतकासवः ॥ क्षारः सुराव्हः पलविंशतिस्यात्सौराष्ट्रिकायाश्च दशैव तानि । पलानि पंक्तीनवसारकश्च यवाग्रजस्यापि ससैंधवस्य ॥ ७३ ॥ पलानि पंचैवकसीसकस्याः पलद्वयं टंकणमेवशस्तं । पलानि पंक्ति स्फटिकाक्षमेव सामुद्रकस्यपलपंक्तियुक्तं ॥ ७४ ॥ संचूर्ण्य सर्वं नलिकाख्ययंत्रे तंगालयेत्काचमये सुपात्रे । पित्तोजयेद्गुल्ममतिप्रवृद्धं प्लीहोदरं विद्रधिमूत्रकृच्छ्रं ॥ ७५ ॥ ग्रंथिः सशूलां कफवातजं च मंदानलं चाश्मरिशोफमर्शी । तक्रेण निंबूत्थरसेन शंखद्रावश्च जंबीरफलोद्भवे तत् ॥ ७६ ॥ इति शंखद्रावः ॥

## अथ गुल्मचिकित्सा ॥

वातपित्तकफैर्द्वंद्वैः सन्निपातेन सप्तमः । रक्तेन चाष्टमस्त्वेते गुल्मास्त्वष्टौ प्रकीर्तिताः ॥७७॥ निशाचूर्णयुतः कन्यारसः प्लीहापचीहरः ॥ कटुतुंबीरसः पानाद्धवेद्गुल्मोदरापहः ॥ ७८ ॥ द्विनिशाशिग्रुवरुणदीप्येंद्रीणांकषायकः ॥ बोलचूर्णयुतो हन्याद्गुल्मोदरसविद्रधीन् ॥ ७९ ॥ हिंगुर्वचा विडं शुंठी जीरं पथ्या च पुष्करं ॥ कुष्ठं भागोत्तरं चूर्णं गुल्माजीर्णोदरापहं ॥ ८० ॥ व्योषाग्निहिंगूचविकाजमोदाकृष्णामूलं कर्षमितं पृथक् च ॥ क्षारद्वयं पंचपटूनि कोलमात्रं क्षिपे-

त्सूक्ष्मकृतं च चूर्णं ॥ ८१ ॥ जंबीरदाडीमरसैश्च भाव्यं पृथक्कविशोष्यं ग्रहणीं च गुल्मं ॥ हन्याद्विषूचीं कुरुतेग्निदीप्तिं चामानुबंधं कफजं विकारं ॥ ८२ ॥ पथ्यामलाब्दात्रिकटूविडंगं त्वक्पत्रग्रंथीकमिदं पृथक् पलं ॥ दंती पलत्रीणि त्रिवृत्पलाष्टकं सितातुलैषां गुटिका मधुकृतां ॥ ८३ ॥ निहंति शीतोदकपानतो हि गुल्मोदरं पांडुप्रमेहशोफान् ॥ मंदाग्निकृच्छ्राणितथाश्मरीं च गुटीविरेकागलगंडकुष्ठं ॥ ८४ ॥ ॥ इति अभयामोदकाः ॥ कुमार्याः सुरसं सिद्धं स्निग्धभांडे निधापयेत् ॥ द्रोणमात्रप्रकल्प्याथ तस्य तुर्यांशकं गुडं ॥ ८५ ॥ हिंगुसौवर्चलाजाजी व्योषं क्षारद्वयं तथा ॥ अजमोदा यवानी च चित्रकं गजपिप्पली ॥ ८६ ॥ विडंगं चव्यतालीसकुटजस्य च त्वक्पलं ॥ बीजानि भृंगराजस्य कुबेराख्यो पलत्रयं ॥ ८७ ॥ कुडवं सैंधवं दद्यात् धातुकीपलमयस्तथा । वह्न्यंगारे ततो भूमौ शृतं पेयं पलैकतः ॥ ॥ ८८ ॥ विनाशयति गुल्मानि तथाष्टमुदराणिच । शोफप्लीहमुदावर्त्तमंत्रवृद्धिमरोचकं ॥ ८९ ॥ विबंधानाहपांड्वर्शः क्रमिकुष्ठादिकान् गदान् । कुमार्यासवसिद्धस्तो ब्रह्मणा निर्मितः स्वयं ॥ ९० ॥ इति कुमार्यासवः ॥ लवणपंचकजीरकषट्कटूयवजस्वर्जिकवेल्लवंगकैः । सरसनिंबुफलानि विचूर्णितैः परिभृतां निगुणैः परिवेष्टयेत् ॥ ९१ ॥ स्वरसपूररसानि दिनाष्टकं तदनुवातरिपोश्च रसे क्षिपेत् । सकलवातरुजं च विषूचिकां हरति भक्षणतो जठरव्यथां ॥ ९२ ॥ श्वसनकासबलासनिकृंतनं कलुषपाचकदीप्तिकरं नृणां । भजति निंबुफलं प्रतियोदिनं कनककांतिरुचिः सभवेत् पुमान् ॥ ९३ ॥ इति वज्रनिंबु ॥

## अथांत्रवृद्धि चिकित्सा ॥

वृद्धयः सप्तगदिता वातात्पित्तात्कफेन च । रक्तेन मेदसामुत्रादंत्रवृद्धिश्च सप्तमी ॥ ९४ ॥ आर्द्रकस्वरसक्षौद्रयुक्ता वृषणवातजित् । पार्श्वहृद्बस्तिशूलानि कोष्ठवातं च दारुणं ॥ ९५ ॥ फलत्रिकोद्भवं क्वाथं गोमूत्रेणैव पाययेत् । वातश्लेष्मक्षतं हंति शोथं वृषणसंभवं ॥ ॥ ९६ ॥ रास्नामृताबलायष्टीगोकंटैरंडजः शृतः । एरंडतैलसंयुक्तो वृद्धिमंत्रभवां जयेत् ॥ ९७ ॥ गोदुग्धैरथवामूत्रैः पिबेदेरंडतैलकं । रसोनं हिंगुनायुक्तं वर्ध्मशूलनिवारणं ॥ ९८ ॥ त्रिकटुत्रिफलाकलिंगहिंगुदिविषाग्निचविकामिशापटूनि । वृकिद्वीवचायवाग्रबिल्वं कटुका-

ग्रंथित्रिजातदेषां ॥ ९९ ॥ चूर्णमुष्णसलिलोरुबूककैर्हंतिकासश्वसना-रुचिक्रमीन् । पांडुगुल्मग्रहण्यंत्रवृद्धिरुक् प्लीहशूलमुदरामवातनुत् ॥ ॥ १०० ॥ इति विजयचूर्णम् ॥ सूक्ष्माणि ताम्रपत्राणि कृत्वास्वं स्वेदये द्बुधः ॥ वासरत्रयमम्लेन ततः खल्वे विनिक्षिपेत् ॥ १ ॥ पादांशं सूतकं दत्वा याममम्लेन मर्द्दयेत् । ततउद्धृत्य पत्राणि लेपयेत् द्विगुणेन च ॥ २ ॥ गंधकेनाम्लघृष्टेन तस्य कुर्याच्च गोलकं । ततः पिष्ट्वा च मीनाक्षीं चांगेरीं च पुनर्नवां ॥ ३ ॥ तत्कल्केन बहिर्गोलं लेपयेदंगुलोन्मितं । धृत्वा तद्गोलकं भांडे शरावेण च रोधयेत् ॥ ४ ॥ वालुकाभिः प्रपूर्याथ विभूतिं लवणांबुभिः । कृत्वा भांडमुखे मुद्रां ततश्चुल्यां विपाचयेत् ॥१०५॥ क्रमवृध्याग्निना सम्यग् यावद्यामचतुष्टयं । स्वांगशीतं समुद्धृत्य मर्द्दयेत्सूरणद्रवैः ॥ ६ ॥ दिनैकं गोलकं कुर्यादर्धं गंधेन लेपयेत् । सघृतेन ततो मूषां पुटेद्गजपुटेन च ॥ ७ ॥ मृतं पिष्टं च तत्ताम्रं हंति गुल्मोदरं कफं । अंत्रवृद्धिं कृमिं शोफं श्वासं क्षौद्रेण रक्तितः ॥ ८ ॥ इति ताम्रमारणं ॥

## अथ शूलचिकित्सा ॥

पृथक्दोषैस्त्रिधाद्वंद्वैः शूलं च सन्निपाततः । आमेन चाष्टमं प्रोक्तं परिणामं तथाष्टधा ॥ ९ ॥ बीजपूररसः क्षौद्रस्वर्जिक्षारेणसंयुतः । हंति हृद्बस्तिशूलानि कोष्ठवातं च दारुणं ॥ १० ॥ लवंगपिप्पलीधान्यपथ्याशुंठीजलश्रृतं । पिबेद्धिंगुचिशूलार्तो कोष्णमष्टावशोषितं ॥ ११ ॥ हिंगुसौवर्चलं शुंठी पुष्करं कोष्णकैः पिबेत् । कल्कमेषंच शूलघ्नं परिणामं च नाशयेत् ॥ ११२ ॥ त्रिकंटबिल्वंरुबुमातुलिंगपाठासशुंठीबृहतीकषायः । सक्षारहिंगूलवणोरुबूकतैलं निहंती च समग्रशूलं ॥ ॥ १३ ॥ रुचकौषधहिंगूनां चूर्णमुष्णांबुना पिबेत् । हृत्पार्श्वशूलविमुच्यां वृद्धिबंधे यवश्रृतैः ॥ १४ ॥ गुडराजिकयोर्लेपस्तक्रेणोष्णो निहंति च । हृत्पार्श्वकटिशूलानि तथा गुग्गुलसैंधवैः ॥ १५ ॥ कुसुंभदारूरजनी गुडं च सौवर्चलं कृष्णतिलापुरश्च । एरंडबीजं गृहधूमराजीलेपो हरेत् शूलमतीवदारुणं ॥ १६ ॥

## अथ हिक्काचिकित्सा ॥

क्षुद्रान्नजा च गंभीरा यमला महती तथा । एता पंचैव विज्ञेया हिक्का

वैद्यप्रपूजितैः ॥ १७ ॥ गुडेन विश्वकल्कस्तु हिक्कां सर्वभवां हरेत् । कणाविश्वाशिवाचूर्णं समधु ससितं तथा ॥ १८ ॥ मधुना लशुनं हंति हिक्कापंचविधं तथा । मधुना पिप्पली लीढा हिक्कापंचकनाशिनी ॥ ॥ ११९ ॥ घृताक्त कासमूलस्य धूमो हिक्काहरन्मतः । मक्षिकाशकृतो नस्यं तथालक्तरसैस्तथा ॥ २० ॥

## अथ छर्दिचिकित्सा ॥

पृथक्दोषैः संन्निपातात् क्रमिभिर्घर्मजां तथा । सप्तैताः छर्दयश्चै-का स्त्रीणां गर्भाच्च जायते ॥ २१ ॥ छर्दिघ्नो मातुलिंगस्य रसो मधु-युतो भवेत् । कपित्थात्रिकटुक्काथ छर्दिर्मधुयुतो हरेत् ॥ २२ ॥ दग्धं मयूरपिच्छं च लीढं क्षौत्रेण छर्दिहृत् । लाजैलात्रिकटूचूर्णं छर्दिर्मधु-युतं हरेत् ॥ २३ ॥ लाजाप्रियंगूघनकोलमज्जाश्रीखंडकृष्णेभकुटील-वंगैः । चूर्णं सितामाक्षिकसंप्रयुक्तं निहंति छर्दिं कफपित्तवातजां ॥ ॥ २४ ॥ कृष्णाशिलोषणं तुल्यं लाजा च तत्समा भवेत् । कपित्था-म्लरसक्षौद्रयुतं छर्दि हरेत् रजः ॥ २५ ॥

## अथ तृष्णाचिकित्सा ॥

तृष्णा च सप्तधा प्रोक्ता वातात्पित्तात्कफादिति । त्रिदोषैरुपसर्गेण क्षयाद्धातोश्च सप्तमी ॥ २६ ॥ लाजोशीराब्जशृंगाट मृणालीकाक-सेरुकैः । सानिलाब्जैः शृतो हंति तृष्णां क्षौद्रेण संयुतः ॥ २७ ॥ प्लावितैः शीतनीरेण सघृतैर्यवसक्तुभिः । नातिसांद्रद्रवैर्मंथस्तृष्णादा-हास्रपित्तहा ॥ २८ ॥ हंति सशर्करोहिमो धान्यकस्य तृष्णा तथा । सधान्योशीरपुष्पैलं क्वथितं शीतलं जलं ॥ २९ ॥ धान्यंचतुर्जाततु-गाह्विजीरं व्योषाग्निग्रंथीचविकं च दाडिमं । एषां च चूर्णं तृट्दाह-शांतिदं पित्तं च शीतेन जलेन सूक्ष्मं ॥ ३० ॥ वटप्ररोहकुष्ठाब्जफ-ललाजैर्मधुकृता । गुटी वदनमध्यस्था हंति तृष्णां च सज्वरां ॥ ३१ ॥ ॥ इति श्रीशामदत्तविरचिते योगेश्वरे श्वासकासादिचिकित्सानाम नव-मः परिच्छेदः ॥ ९ ॥

## अथ कुष्ठचिकित्सा ॥

अष्टादशैवकुष्ठानिवातपित्तकफैरपि । जातान्येषां चिकित्स्यं च किंचिदत्रोच्यते मया ॥ १ ॥ पटोलत्रिफलानिंबनिशाकटुवचारुणैः ॥

कृतः क्काथो हरेत् कुष्ठं कफपित्तसमुद्भवं ॥ २ ॥ निंबूदलानां कल्क-
स्तु जयेत्कुष्ठनिभः क्षणात् । तथा त्रिफलक्काथेनबाकुचोबीजचूर्णकं ।
॥ ३ ॥ चतुष्पलारुष्करमष्टश्रेष्ठापंचाम्रबाकूचिचतुर्विडंगं ॥ त्रिवृच्छि-
लाजीदवगुग्गुलानां पृथक् पलं चित्रकपुष्करैकं ॥ ४ ॥ पलं चतुर्जात
कव्योषकेभ्यः सर्वैः समा शर्करयां विदध्यात् । कृत्वा गुटीं मुष्टिमि-
तां प्रयुंजयेत् सर्वेषु कुष्ठेषु शिरोर्द्धरोगे ॥ ५ ॥ सप्ताव्हभूनिंबवरीवृकी-
णां वचानिशायुक्त्रिफलाविषाणां । शम्याकमूर्वाशिरपर्प्पटानां पटो-
लकृष्णागजपिप्पलीनां ॥ ६ ॥ गोपीद्वयेंद्रीवृषयासयष्ठीत्रायंतिनिंबा-
मृतपद्मकानां मुस्ताकटूचंदनवासवानां मरीचचूर्णष्टगुणे जले च ॥
॥ ७ ॥ द्वचंशेवृतादामलकीरसेनपक्कं च गोसर्पि निहंति कुष्ठं । विस-
र्पपांडूपिटिकास्त्रपित्तकंडूवमिभ्रांतिगरार्शगुल्मं ॥ ८ ॥ इति अमलकी-
घृतं ॥ स्नुह्यर्कदुग्धं धत्तूरं रसं महिषिविट्रसं । प्रत्येकं कुडवं तैलप्र-
स्थं गोमूत्रमाढकं ॥ ९ ॥ गंधकाग्निशिलातालं विडंगातिविषाविषं ।
तिक्तकोशातकी कुष्ठं वचा मासी कटुत्रयं ॥ १० ॥ पीतदारु च यष्टया
व्हः स्वर्जिकाक्षारजीरकं । देवदारु च कर्षांशं चूर्णं क्षिप्त्वा विपाच-
येत् ॥ ११ ॥ पक्कं तैलावशेषं तु हंति दद्रुविचर्चिकां । वज्रतैलमिति-
ख्यातमभ्यंगात्सर्वकुष्ठनुत् ॥ १२ ॥ इति वज्रतैलं ॥ अर्कक्षीरेण संम-
र्दैत् तालं तस्य च गोलकं । अधोर्ध्वं भस्मनीरुध्वात्वश्वत्थत्वक्समा
भवेत् ॥ १३ ॥ निवेश्यपिठरी मध्ये मुद्रयेच्छ्रावेण रोधयेत् । अधोग्निं ज्वा
लयेत्सम्यक् यामाष्टसंक्षयाद्भिषक् ॥ १४ ॥ स्वांगशीतं समुद्धृत्य खल्व-
मध्ये विमर्दयेत् । सितया तंदुलं खादेत् दुग्धान्नं पथ्यमावपत् ॥ १५ ॥
कुष्ठं श्वासं क्षयं दद्रुवातपित्तमुरःक्षतं । हंति मृतं हरितालं वातरक्तं
न संशयः ॥ १६ ॥ इति हरितालः ॥ शुद्धसूतं द्विधा गंधं मर्द्यं कंन्या-
द्रवैर्दिनं । तद्गोलं पिठरीमध्ये ताम्रपात्रेण रोधयेत् ॥ १७ ॥ सूतका-
त्त्रिगुणेनैव शुद्धेनाधोमुखेन च । पार्श्वे भस्मनिधायाथ पार्श्वार्द्धे गोम-
यं जलं ॥ १८ ॥ किंचित्किंचित्प्रदातव्यं चूल्यां यामद्वयं पचेत् ।
चंडाग्निना तदुद्धृत्य स्वांगशीतं विचूर्णयेत् ॥ १९ ॥ काकोदुंबरिकाव-
न्हित्रिफलाराजवृक्षकं । विडंगं बाकुचिक्काथ एतेन भावयेत्ततः ॥ २० ॥
दिनैकमुदयादित्यो रसो देयो द्विगुंजकः । अनुपानं प्रकर्त्तव्यं बाकुची
बीजचूर्णकं ॥ २१ ॥ खदिरस्य कषायेण समेन परिपाचितं । त्रिपाणां

तद्वंशक्षीरैः क्वाथैर्वा त्रैफलैः पिबेत् ॥ २२ ॥ त्रिदिनांते भवेत्स्फोटः सम्राहाच्च किलालके । नीलीं गुंजां च कासीसं धत्तूरं हंसपादिकां ॥ ॥२२॥ सूर्यभक्ता च चांगेरी पिष्ट्वा पिष्ट्वा तु लेपयेत्। स्फोटस्थाने प्रशांत्यर्थं सप्तवारं पुनः पुनः॥२३॥ विचर्चिकां दद्रुकुष्ठं कोटरीकं तथार्बुदं। श्वेतकुष्ठं निहंत्याशु साध्यासाध्यं न संशयः ॥ २४ ॥ इति कुष्ठहारसः॥

## अथ दद्रुचिकित्सा ॥

नालिकेरास्थिजं तैलं दद्रुकंडुं विनाशयेत् । तथा लोबानजं तैलं लेपाच्च देवधूपजं ॥ २५ ॥ मरिचं चंदनोशीरनिशादारुमनःशिला ॥ त्रिवृदश्वहरामूलं मुस्तालार्कपयोविषं ॥ २६॥ पृथक् कर्षमितैरेतैः प्रस्थं चकटुतैलतः ॥ गोमूत्रस्याढकेनैव पाच्यं मृद्वग्निना ततः ॥ २७॥ दद्रुमभ्यंगतो हंति पामाकंडुविचर्चिका । कुष्ठं सिध्मानि कृच्छ्रं च तैलं च मरिचादिकं ॥ २८ ॥ इति मरिचादितैलं ॥ दूर्वासैंधवपुन्नाटपथ्याकूटेरिकारजः ॥ कांजिकेन त्रिभिर्लेपैर्दद्रुकंडुं विनाशयेत् ॥ २९ ॥

## अथ पामाचिकित्सा ॥

निशाकल्कार्कपत्रोत्थरसेन सार्षपं पचेत् ।तैलमभ्यंगतो हंति पाम दद्रुविचर्चिकाः ॥ ३१ ॥ अर्कस्नुहिपयः कुष्ठपटुमार्कवचित्रकैः । गोमूत्रेण सत्वग्भिश्च पक्वं तैलं व्रणापहं ॥ ३२ ॥ सिंदूरं गुग्गुलं सिक्थं तुत्थमेषां रसांजनं । चूर्णे चतुर्गुणे नीरे कटुतैलं विपाचयेत् ॥ ३३ ॥ तैलं मर्दनतो हंति दद्रुं पामां विचर्चिकां । शुष्कां श्रवंति पिटिकां सकृदभ्यंगतो हि तत् ॥ ६४ ॥ करंजधावनीनिंबपटोलीत्रिफलामृतं ॥ वृषमेषां क्वाथकल्कैः सम्यक् पक्वं च गोघृतं ॥ ३५ ॥ हंति कुष्ठरुजं पामां व्रणं दद्रुविचर्चिकां । वातपित्तं वातरक्तं घृतं पानान्न संशयः ॥ ॥ ३६ ॥ वो दारुरालकंपिल्लमयनं तुत्थटंकणं । मुस्तं घृतेन लेपाच्च व्रणं पामां जयेद्ध्रुवं ॥३७॥ यवसैंधवपुन्नाटसर्षपानां च चूर्णकं । गोमूत्रेण हरेत् कंडूर्लेपनात्दद्रुनाशनं ॥ ३८॥ करंजतैलसंयुक्तं कुंकुमं कृमिकंडुहृत् । शुक्तिभस्मयुतं तच्च लेपनात् कृमिकंडुजित् ॥३९॥ प्रपुन्नाटस्य बीजानि बाकुची सर्षपास्तिलाः । कुष्ठं निशाद्वयं मुस्तपिष्टातक्रेण लेपयेत् ॥ ४० ॥ सततं तेन नश्यंति कंडुदद्रुविचर्चिकाः ॥ तथा दद्रुघ्नसिंदूरं कुष्ठानां च प्रलेपनात् ॥ ४१ ॥

## अथ सिध्मचिकित्सा ॥

पटोलामृताखादिरं वृषनिंबपत्रत्वचा । कल्कक्काथे घृतं पक्कं वीसर्पसिध्मनाशनं ॥ ४२ ॥ त्रिफलारिष्टभूनिंबद्वेनिशे रक्तचंदनं । एतैः सिद्धमरुर्षीणां सिध्मानां नाशनं मतं ॥ ४३ ॥ धात्रीससर्ज्जजं चूर्णं सौवीरेण प्रलेपनात् । सिध्मानि नाशयत्याशु तथा पामां विचर्चिकां ॥ ॥ ४४ ॥ सोमलश्चंदनेनैव लेपात्सिध्महरो मतः । पुन्नाटबाकुचीतक्रसैंधवैर्लेपनात्तथा ॥ ४५ ॥

## अथ विस्फोटकचिकित्सा ॥

पटोलसप्ताव्हनिशाखदीरमुस्ताग्निनिंबामृतवासकानां । दार्वीयुतानां क्वथनो निहंति वीसर्पविस्फोटमसूरिकाश्च ॥ ४६ ॥ बिरालीत्रिफलाधान्यनिशाहिमपितो जयेत् । अंतर्दाहं च विस्फोटं शर्करामधुसंयुतः ॥ ॥ ४७ ॥ शुद्धसूतकरसयोः कर्षं गुडपलार्द्धकं । गुटिका विंशतिः कार्याः प्रातः सायं प्रदीयते ॥ ४८ ॥ एकैकां शीतनीरेण पथ्यं दुग्धान्नमावपेत् । मुखपाके प्रसेके च गंडूषान् कारयेद्भिषक् ॥ ४९ ॥ खदिरंजातिपत्राणां क्काथेन मधुना जयेत् । मुखपाकमयं योगो हंति विस्फोटकामयान् ॥ ५० ॥ रसकर्पूरकर्षं च पलं बब्बुलकोकिलात् । अनयोः सूक्ष्मचूर्णेन दशाहानि च भक्षणात् ॥ ५१ ॥ मसूरिकाश्च विस्फोटाः प्रमेहपिटिकाध्रुवं । तेन नश्यंति पथ्ये च चणकान्दापयेद्भिषक् ॥ ५२ ॥ कर्षं दरदचूर्णस्य बब्बूलकोकिलात्पलं । एतयोश्च दशाहानि प्रातः सायं च धूमतः ॥ ५३ ॥ शालितंदुलदुग्धं च भिषक्पथ्यं प्रदापयेत् । विस्फोटस्तेन नश्यंति प्रमेहपिटिकास्तथा ॥ ५४ ॥ दग्धं च त्रिफलाचूर्णं सुगंधीतैलसंयुतं । हंति विस्फोटकान् तीव्रान् प्रमेहपिटिकास्तथा ॥ ५५ ॥

## अथ भगंदरचिकित्सा ॥

खदिरत्रिफलाक्काथो महिषीघृतसंयुतः । विडंगचूर्णयुक्तश्च भगंदरविनाशनः ॥ ५६ ॥ त्रिपलत्रिफलाचूर्णं कृष्णाचूर्णपलोन्मितं । गुग्गुलुः पंचपलिकः क्षोदयेत्सर्वमेकतः ॥ ५७ ॥ ततस्तु गुटिकां कृत्वा प्रयुंजीत न्हय्र [illegible] नया । भगंदरं गुल्मशोफमर्शांसि च विनाशयेत् ॥ ५८ ॥ जातीपटोलमं [illegible] दिनिशासारिवोशिरैः । तिक्तानिंबसिक्थतुल्थकरं-

जैः पाचितं घृतं ॥ ५९ ॥ अस्यलेपेन रोहंति सूक्ष्मनाडीव्रणाः अपि। मर्माश्रिताः क्लेदिनश्च गंभीराः सरुजो व्रणाः ॥ ६० ॥ ॥इति जात्यादिघृतं ॥ त्रिफलारिष्टभूनिंबद्वेनिशे रक्तचंदनं । एतैः सिद्धमरुंषीणां तैलमभ्यंजनो हितं ॥ ६१ ॥ निंबपत्रं तिला दंती त्रिवृत्सैंधवमाक्षिकं। दुष्टव्रणप्रशमनो लेपःशोधनरोपणः ॥ ६२ ॥

## अथ कंठमालाचिकित्सा ॥

गुग्गुलुःत्रिफलाक्वाथो पिप्पलीचूर्णसंयुतः । कंठमालां गंडमालां हरेत् श्लीपदजां व्यथां ॥ ६३ ॥ त्रिफलाक्वाथकल्केन पाचितं गोघृतं हरेत् । पानमर्दनतो मालां गडगंडसमुद्भवां ॥ ६४ ॥ भार्गीशिलाक्षीरदधिदेवदारुनिशाब्दशुंठीपटुगुग्गुलानां । कदंबनिर्गुंडिरुबूकतार्क्ष्यकंपिल्लबिल्वेहरिआमलानां ॥ ६५ ॥ कल्केन स्नुह्यर्कपयोभिपक्वं समैश्च नीरेण चतुर्गुणेन । तैलं हरेत् दुष्टव्रणार्शग्रंथीसकंठमालागलगंडरोगान् ॥ ६६ ॥ पारदं गंधकं तुत्थं प्रत्येकं शाणमात्रकं । पुन्नाटमरिचं वल्गुबीजंत्रीशाणिकं पृथक् ॥ ६७ ॥ सर्वमेकत्र संपिष्य गोघृतेनैव लेपयेत् । विचर्चिकां दद्रुपामां गंडमालां नियच्छति॥६८ ॥ चिंचाश्वत्थत्वचो भस्म स्नुहिक्षीरेण लेपनात् । हंति पामां कंठमालां गंडमालां विचर्चिकां ॥ ६९ ॥ इति श्रीशामदत्तविरचिते योगेश्वरे कुष्ठादिचिकित्सानाम दशमः परिच्छेदः ॥ १० ॥

## अथ वातरक्तचिकित्सा ॥

पृथक्दोषैस्तथा द्वंद्वैः सप्तमं संनिपाततः । रक्ताधिक्यादष्टमं तु वातरक्तमिदं विदुः ॥ १ ॥ अमृतायाश्च स्वरसो ह्येरंडतैलमिश्रितः । निहंति वातरक्तं च पानतः सर्वसंभवं ॥ २ ॥ वासामृतारग्वधानामेरंडतैलसंयुतः कषायो हंति वातास्रं सर्वांगेषु समुद्भवं ॥ ३ ॥ प्रस्थामृता च त्रिफला त्रिप्रस्थं सार्द्धांबुद्रोणेन विपाच्य पूर्णं । अर्धावशिष्टं क्वथनं विगृह्य पूते क्षिपेत् गुग्गुलुः प्रस्थमस्मिन् ॥ ४ ॥ विपाचिते भूय घनत्वनीते क्षिपेद्विडंगाद्धपलं गुडूच्याः । पलं द्विमुष्टित्रिफलोपणाख्यं दंतीत्रिवृदर्धपलं विचूर्ण्य ॥ ५ ॥ शाणप्रमाणा गुटिका निहंति कैशोरकाख्या व्रणमेहकुष्ठं । वातास्रगुल्मं श्वयथुं च पांडुभगंदरं श्वासकफामयं च ॥६ ॥ इति कैशोरगुग्गुलः ॥ द्राक्षामधुकपुष्पाणां क्वाथेन सितयासह । पक्वं च

---

१ समुद्रशोष.

गोघृतं हंति वातरक्तं च पानतः ॥ ७ ॥ रसे गुडूच्या द्विगुणे गोदुग्धे च चतुर्गुणे । पक्कं घृतं निहंत्याशु वातरक्तं न संशयः ॥ ८ ॥ मधुत्थसारिवारालमंजिष्ठाकल्कसंयुतं । पक्कं पिंडाक्षकं तैलमभ्यंगाद्वातरक्तनुत् ॥ ९ ॥

## अथ वातव्याधिचिकित्सा ॥

शृंगीपटोलद्विनिशाविडंगं भूनिंबहिंगूगदकट्फलं च । एरंडरास्नामृतराजवृक्षशतं च तिक्तात्रुटित्वक्कुकरंजं ॥ १० ॥ व्योषाजमोदातिविषेभकृष्णारोहिण्यनंतापुरदंतिधान्यं । रसोनवासेंद्रयवाजगंधात्रायंतिपाठावरिवल्गुबीजं ॥ ११ ॥ त्रिवृदनंताचित्रकं ग्रंथिचव्यं मूर्वागरूचंदनब्रह्मकाष्ठं । ब्राह्मी यवानी दशमूलपथ्या मिश्रेयदारूघनपर्पटं च ॥ १२ ॥ एषां कषायो विनिहंति रोगान् वातोद्भवान् सर्वभयान् द्विरांश्च । मन्याहनुपृष्ठिकटिग्रहांश्च शृंग्यादिको वायुगदे प्रशस्तः ॥ ॥ १३ ॥ इति शृंग्यादिक्काथः ॥ रास्नादला शुंठि पुनर्नवा च पथ्याश्वगंधा सटिदेवदारु । एरंडमुंडी हपुषा रसोन मिश्रेयवासा चविधन्वयासं ॥ १४ ॥ विषा श्वदंष्ट्रा पुरवृद्धदारुः प्रसारणी पुष्करपंचमूलं कुरंटकारग्वधरक्तयष्टी यवानिपीयूषमिमैः शृतश्च ॥ १५ ॥ वृद्धरास्नादिको हंति हनुग्रहशिरोग्रहं । आर्दिताक्षेपजं कुब्जं गृध्रसीं शूलसंधिगं ॥ १६ ॥ इति वृद्धरास्नादिक्काथः । ग्रंथीकचव्याग्निविडंगशुंठीकृष्णाजमोदागजपिप्पलीनां । हिंगुद्विजीरातिविषेंद्रबीजमूर्वावशाभांर्गिवृकीकटूनां ॥ १७ ॥ सग्रंथिनां चूर्णमनः समस्तात् फलत्रिकस्य द्विगुणं प्रकल्प्यं । सर्वैः समो गुग्गुलु एव सर्वमेकत्र संकुट्य वटी कृतश्च ॥ १८ ॥ शाणोन्मितो गुग्गुलुयोगराजो निहंति वातामयमेहकुष्ठं । वातास्रगुल्मं श्वसनाग्निमांद्यं भगंदरं शूलमुरोग्रहं च ॥१९॥ इति योगराजगुग्गुलुः ॥

## अथ रक्तपित्तचिकित्सा ॥

रक्तपित्तं त्रिधा प्रोक्तमधोगं कफसंगतं । उर्ध्वगं मारुतात् ज्ञेयं तद्द्वयेन द्विमार्गगं ॥ २० ॥ सिंहाननरसः क्षौद्रयुतश्च रक्तपित्तजित् । द्राक्षाफलत्रयं फाटः सितामधुयुतस्तथा ॥ २१ ॥ मृद्वीकावृषपथ्यानां क्वाथो मधुसितायु ः । रक्तपित्तं निहंत्याशु श्वासकासं न संशयः ॥

॥ २१ ॥ जंम्बाम्रपल्लवाद्धीमः क्षौद्रेण रक्तपित्तजित्। उदुंबराश्वत्थ-फलकल्को मधुयुतस्तथा ॥ २२ ॥ निष्कुलीकृतकूष्मांडं खंडातपल-शतं पचेत्। निक्षिप्य द्वितुलानीरे त्वर्द्धशिष्टं च गृह्यते ॥ २३ ॥ तानि कूष्मांडखंडानि पीडयेत् दृढवाससा। आतपे शोषयेत्किंचिच्छूलाग्रैर्ब-हुशो व्यधेत् ॥ २४ ॥ क्षिप्त्वा ताम्रकटाहे च दद्यीताष्टपलं घृतं। तेन किंचित् भर्जयित्वा पूर्वोक्तं तज्जलं क्षिपेत् ॥ २५ ॥ खंडात्पलशतं दत्वा सर्वमेकत्र पाचयेत्। सुपक्के पिप्पलीशुंठी जीराणां द्विपलं पृथक् ॥ २६ ॥ पृथक्पलार्द्धं धान्याकं पत्रैलामरिचत्वचः। चूर्णीकृत्य क्षिपे-त्तत्र घृतार्द्धं क्षौद्रमावपेत् ॥ २७ ॥ खादेदग्निबलं दृष्ट्वा रक्तपित्तज्वरी-क्षयी। शोकतृष्णातमच्छर्दिकासश्वासक्षतातुरः ॥ २८ ॥ इति कूष्मांडपाकः ॥

## अथ भ्रम चिकित्सा ॥

ब्राह्मीरसो मधुयुतो भ्रममूलं हरेस्तथा। शंखिनीस्वरसो हंति भ्रमं कुष्टमधूयुतः॥२९॥दुरालभाकषायश्च गोघृतेन भ्रमं जयेत्। शंखिनी-कुष्ठषड्ग्रंथीहितो मधुयुतस्तथा ॥ ३० ॥ हरितकीब्राह्मीमरीचकुष्टं च चानिशाधन्वयवासकानां। मधूपलाभ्यां गुटिकाविधेया भ्रमं निहंति च मनो विकारान् ॥ ३१ ॥ चतुर्गुणे ब्राह्मिरसे च शंखपुष्पी वचा-गदकल्केन युक्तं। पक्कं घृतं हंति मनोविकारान् मेधस्करं बुद्धिविहीनपुंसां ॥ ३२ ॥ इति ब्राह्मीघृतं ॥

## अथ श्लीपदचिकित्सा ॥

श्लीपदं च त्रिधाप्रोक्तं वातात्पित्तात्कफादपि। गुडूचीस्वरसो हंति श्लीपदं मधुसंयुतः ॥ ३३ ॥ शुंठीक्काथो मधुयुते श्लीपदघ्नो भवेत्तथा। सुराव्हक्कथने हंति श्लीपदं मधुसंयुतः ॥ ३४ ॥ पिष्टगुंजाफलैर्लेपः श्लीपदघ्नो भवेत्तथा। सर्षपं शिग्रुबीजानां लेपोजामूत्रसंयुतः॥ ३५ ॥ धत्तूरैरंडनिर्गुंडीवर्षाभूशिग्रुसर्षपैः ॥ प्रलेपः श्लीपदं हंति त्वजामूत्रेण संयुतः ॥ ३६ ॥

## अथ विसर्पचिकित्सा ॥

वातपित्तकफैर्द्वंद्वैः सन्निपाताभिघाततः। वन्हिदाहेन नवमो वि-सर्पनवधा मतः ॥ ३७ ॥ खदिरत्रिफलारिष्टपटोलामृतवासकैः। क्वतः

काथकवोष्णस्तु विसर्पनाशने मतः ॥ ३८ ॥ द्विचंदनशिरामूर्वाद्वि-नीशापद्मकेसरं । सारिवात्रिफलामेदामधुकोशीरपद्मकं ॥ ३९ ॥ मधुपर्णीकर्षमितैः कल्कैश्चतुर्गुणे जले । पक्वं घृतं विसर्पं च हंति पामादिषामयान् ॥ ४० ॥ द्विनिशाकुष्ठशिरिषयष्टीमांसीनतोशिरैः । सत्रुटीचंदनैर्लेपो व्रणवीसर्पनाशनः ॥ ४१ ॥ इति श्रीशामदत्तविरचिते योगेश्वरे वातरक्तादिचिकित्सानाम एकादशः परिच्छेदः ॥ ११ ॥

## अथ शिरोरोगचिकित्सा ॥

वातेनार्द्धावभेदस्यात्पित्तदोषैः पृथग् भवेत् । सन्निपाताच्च रक्ताच्च सूर्यावर्त्तश्च सप्तमः ॥ १ ॥ शिरोपाकश्च कृमिभिः शंखकेन दश स्मृताः । तथा कपोलरोगा स्युर्नवते पूयशीर्षकं ॥ २ ॥ अरुंषिकाविद्रधिश्च दारुणं पिडकार्बुदं । इंद्रलुप्तं च खलति पलितं चेति ते नव ॥ ३ ॥ किरातं दशमूलं च नागरं धन्वयासकं । एषः क्वाथः शिरःपीडां भ्रमं हंति न संशयः ॥ ४ ॥ तुगामधुककाकोलीद्राक्षाखर्जुरकोहिमः । गोक्षिरनवनीताभ्यां शिरःपीडां भ्रमं जयेत् ॥ ५ ॥ कुंकुमं मधुकं श्यामा शुंठी चंदनवालुकं । भृंगराजस्तुगा द्राक्षा विडंगं गुडुची तथा ॥ ६ ॥ निपीतं क्षीरमःवाज्यैश्चूर्णमेषां व्यपोहति । सर्वोद्भवां शिरःपीडां व्यथां शिरोर्द्धजां तथा ॥ ७ ॥ कृष्णापथ्यां मिश्रीशुंठीयासानां गुटिका कृता । गुडेनार्द्धशिरःपीडां हरेत्सर्वशिरोव्यथां ॥ ८ ॥ करंजचित्रकोजातीकरवीरश्च पाचितं । तैलमेभिर्हतं हन्यादभ्यंगादिंद्रलुप्तकं ॥ ९ ॥ मधूकसारत्रिफलायष्टीनां क्वाथकल्कितैः । पक्वं नस्ये कृतं तैलं केशश्मश्रुविवर्द्धनं ॥ १० ॥ भृंगराजरसे पक्वं सारिवायोमलैः सह । तैलं हरेदिंद्रलुप्तं दारुणं पलितं तथा ॥ ११ ॥ कुंकुमंशर्कराचूर्णं घृतेन नस्यतो हरेत् । भ्रूकर्णाक्षिशिरःशंखशूलं दीनादिजां व्यथां ॥ १२ ॥ गुडेन नागरं हंति तथा लवणपिप्पली । वारिणा नस्यतो मन्याहनुःशिरोर्ध्वजां व्यथां ॥ १३ ॥ मरिचं पिप्पलीलोध्रशिलाचूर्णं दिनस्यतः । सूक्ष्मं च वारिणा पिष्टमर्द्धशीर्षव्यथां जयेत् ॥ १४ ॥ शीमलान्हिकणाशुंठीचूर्णस्य भाललेपनात् । वारिणा नश्यति पीडाशिरोर्द्धशीर्षशंखजा ॥१५ ॥ पक्त्वा जलेन निर्गुंडीनिंबपत्राणि बंधनात् । एरंडमिश्रिबाष्पस्तु शिरः पीडां व्यपोहति ॥ १६ ॥

## अथ नेत्ररोगचिकित्सा ॥

चतुर्नवतिराख्याता नेत्ररोगाश्च वर्त्मजाः । चतुर्विंशतिरेषुस्युर्नवसं धिगता मता ॥ १७ ॥ त्रयोदश सितोद्भूता पंच कृष्णोद्भवाश्च षट् । काचामया षट् तिमिर सप्त च लिंगनाशनः ॥ १८ ॥ अष्टौ च दृष्टिरोगा स्यु श्चत्वारश्चाधिमंथजाः । अभिष्यंदाश्च चत्वारस्त्वष्टौ सर्वाक्षिसंभवाः ॥ १९ ॥ त्रिफलानिंबभूनिंबगुडूचीरजनीभवः । क्राथं गुडयुतः पीतः शीर्षशूलविनाशनः ॥ २० ॥ त्रिफलाया निशीचूर्णं लीढं मध्वाज्यसंयुतं ॥ हंति सर्वाक्षिरोगांश्च तथा गोदुग्धशर्करा ॥ २१ ॥ पिष्ठा च निंबपत्राणि स्तन्येनैव विपाचयेत् । बंधनात्तेन नश्यंति नेत्रपीडाश्च दारुणाः ॥२२॥ पिष्ठा च त्रिफलाचूर्णं कोष्णं गोदुग्धपाचितं। हंति सर्वाक्षिरोगांश्च बंधनाच्च तथामृता ॥ २३ ॥ पथ्यासैंधवकर्पूररसांजनसगैरिकैः । सुखोष्णश्च बहिर्लेपो जलेन नेत्ररोगहा ॥ २४॥ हिमाहरीतकीलोध्रमशीसैंधवजं रजः । निंबूरसेन नयने पिष्टमाश्चोतनं हितं ॥ २५ ॥ पथ्याकर्पूरखदिरैः स्तन्येन गुटिकाः कृताः । तदंजनाश्च नश्यंति नेत्ररोगाश्च दारुणः ॥ २६ ॥ शिग्रुपल्लवसंभूतो रसो मधुयुतो हरेत् । पुराणान्सर्वसंभूतान्नेत्ररोगांश्च दारुणान् ॥ २७ ॥ सितयाब्धिकफो हंति पुष्पं गोशकृता कणा । नक्तांध्यं च तथा शुक्रमंजनान्मधुमाक्षिकं ॥ २८ ॥ समुद्रफेनं त्रिफलाविडंगं रसांजनं कुर्कुटिकांड खंडं । व्योषं लवंगाब्धिफलं च शंखिनी रात्रिशिलैषं गुटिकां च कारयेत् ॥ २९ ॥ गुटि त्वंजनतो हंति तिमिरं शुक्रवर्त्मरुक् । वातकंडूश्रुपटलं शोथं नक्तांध्यकाचरुक् ॥ ३० ॥ सिंधूत्थत्रिफलाव्योषं चूर्णस्य गुटिका कृता । छागलीपयसा शुष्का छायया हंति त्वंजनात् ॥ ३१ ॥ पुष्पदुग्धेन तिमिरं मधुना च शिवांभसा । पटलं रंभांभसाश्रु नक्तांध्यं कामलां तथा ॥ ३२ ॥ इति चंद्रप्रभागुटी । पथ्याक्षामलकीक्राथे भृंगौषधरसे शुभे । मध्वाज्यछागलीदुग्धे गोमूत्रे च पृथक् पृथक् ॥ ३३ ॥ दशवारांश्च गलितं नागं पुनः पुनः क्षिपेत् । नवत्येवं भवेन्नागं शुद्धं नेत्रगदापहं ॥ ३४ ॥ इति न्योउगलशीसं ॥ शुद्धौ नागरसौ तुल्यौ तयोर्द्विगुणमंजनं । किंचित्कर्पूरसंयुक्तमंजनान्नेत्ररोगजित् ॥ ३४ ॥

## अथ पीनसचिकित्सा ।

पृथक्दोषैः सन्निपाताद्रक्तादपीनसोर्बुदं । नासानाहः पूतिनासो

नासार्शः श्रावभ्रंश तु ॥ ३६ ॥ पुटकः पूतिरक्तं च दुष्टपीनसदीप्ति च । नासानाशः घ्राणपाक एवं च पीनसोष्टधा ॥ ३७ ॥ निद्राकाले जलं शीतं यः पिबेच्छयनस्थितः । पीनसान्मुच्यते सोहि वल्लगोधूमभक्षणात् ॥ ३८ ॥ चंदनोशीरभूनिंबतिक्ताशुंठीबिभीतकैः । कृतः क्वाथो हरेत्कोष्णः सर्वोद्भूतं च पीनसं ॥ ३९ ॥ तिंतिडीकाग्नितालीसतुगाचव्याम्लवेतसं । अजाजीत्रिकटूपत्रं त्वगेलैतानि चूर्णयेत् ॥ ४० ॥ गुडेन गुटिका तस्य स्वरक्षीणं च पीनसं । हंति भक्षणतोवश्यमरुचिं च कफामयं ॥ ४१ ॥ दधीगुडकृतो मंडस्तीक्ष्णकल्केन संयुतः । पीनसं नाशयत्याशु तथा शुंठ्युद्भवः शृतः ॥४२॥ प्रातः कालेपिबेद्यस्तु नासारंध्रेण शीतलं । जलं तस्य च नश्यंति पलितं पीनसाक्ष्यगाः ॥४३॥

## अथ कर्णरोगचिकित्सा ।

वातात्पित्तात्कफाद्रक्तात्संन्निपाताच्च विद्रधेः । शोथोर्बुदं पूतिकर्णं कर्णार्शः कर्णहल्लिरा ॥ ४४ ॥ बाधिर्यं तंद्रिका कंडूं शष्कुलीकृमि कर्णकः । कर्णनादः प्रतीनाहं इत्यष्टादश कर्णजः ॥ ४५ ॥ पक्वंघृता क्तमनले पाचितं चार्कपत्रकं । तत्तोयं च भृतं कर्णपूयशूलं च नाशयेत ॥ ४६ ॥ जीवंती मधुकं द्राक्षा विडंगं लवणं मिशी । तगरैरंडशुंठी त्वग् एषां कल्के विपाचितं ॥ ४७ ॥ भृंगराजरसो दुग्धे सर्पिः कर्णे च पूरणा । हंति दशनशिरसोर्गदं कर्णव्यथां तथा ॥ ४८ ॥ रसोनजातिनिर्गुंडी सुरसार्द्रकसिंधु च ॥ कारवल्ली रविक्षुद्रा रंभा च भृंगराजकः ॥ ४९ ॥ एतेषां स्वरसे पक्वं तैलं कर्णे भृतं हरेत् । बाधिर्यं कर्णपूयं च जाड्यं च कर्णनादकं ॥ ५० ॥ गोमयोत्थरसे पक्वं तैलं कर्णे च पूरणात् । हंति सर्वाणि शूलानि बाधिर्यं पूयमेव च ॥ ५१ ॥ सैंधवं बस्तमूत्रेण कोष्णेन कर्णपूरणात् । तथानिंबुरसैर्दग्धं कपर्दं कर्णरोगजित् ॥ ५२ ॥ घृताक्तस्य रसोनस्य धूमः कर्णे निषेवणात् । हंति सर्वाणि शूलानि नश्यंति कर्णजामयाः ॥ ५३ ॥

## अथ मुखरोगचिकित्सा ॥

चतुःसप्तति रोगाश्च मुखजाः परिकीर्तिताः । मुखपाको भवेद्वातात्पित्तात्तद्वत्कफादपि ॥५४॥ रक्ताच्च संनिपाताच्च पूत्यास्योर्द्ध्वगदावपि । अर्बुदं चेति त्वष्टौहि मुखांतःसंभवा गदाः ॥ ५५ ॥ गोमूत्रेण

विषा पाठेंद्रजतिक्ताब्ददारुणां । क्वाथः क्षौद्रेण संपीतो गलव्याधिहरः कृतः ॥ ५६ ॥ रसांजनं दारुनिशा च कृष्णा यवाग्रजस्तेजवती सपाठा । गुडकृतेषां गुटिका निहंति मुखे धृता सर्वगलामयांश्च॥ ५७॥ फलत्रिकामृतादारुद्राक्षाजातिप्रवालजः । क्वाथे भवेन्मधुयुतो गंडूषान्मुखरोगजित् ॥ ५८ ॥ जातिपत्रामृतायास्ते दार्वीद्राक्षाफलत्रिकैः । कृतः क्वाथो मधुयुतो गंडूषान्मुखरोगजित् ॥ ५९ ॥ कटुतुंबीफलरसे कटुतैलं विपाचयेत् । तत्तैलंगंडुषान् हंति मुखपाकं नसंशयः ॥ ६० ॥ धातुकी मधुकपद्मकारुणा कट्फलाब्दत्रुटिकेसरत्वचा । क्वाथकल्कसहितं विपाचितं तैलमास्यद्विजरुग्हरं परं ॥ ६१ ॥

## अथ दंतरोगचिकित्सा ॥

गुडूचीक्वाथगंडूषात् दंतशूलं विनश्यति । तथार्कपत्रसंस्वेदात् दंताः स्युः सघनाघठाः ॥ ६२ ॥ वासाकसेरुस्वरसः कर्णे च पूरणाद्धरेत् । दंतशूलं दंतकृमीन् कंडूं दंतरुजं तथा ॥ ६३ ॥ द्वियामिनी तेजवती च पाठा तिक्तारुणा लोध्रगदाब्दमेषां । संघर्षमात्रेण निहंति चूर्णं रक्तच्युतिं कंडुरुजो द्विजानाम् ॥ ६४ ॥ चर्वितं तिलभल्लातं निहंति दंतजां व्यथां । तथाबकुलत्वग् हंति दंतजान् दारुणान् गदान्॥ ६५॥

## अथ केशरंजनं ॥

चतुष्पदानां त्वग्रोमनखशृंगास्थिभस्मभिः । तिलेनसह लेपोयं रोमसंजननः परं ॥ ६६ ॥ इंद्रवारुणिकाबीजतैलमभ्यंगनात् ध्रुवं । भवंति कुंतलाः श्यामाः अलिभाः सघनाघटाः ॥ ६७ ॥ अयोरजो भृंगराजत्रिफला कृष्णमृत्तिकाः । स्थितमिक्षुरसे मासं लेपनात्पलितं जयेत् ॥ ६८ ॥ धात्रीपलद्वयं पथ्या द्वेपलैकं बिभीतकं । पंचाम्रं भृंगराजस्य लोहस्य कार्षिकं तथा ॥ ६९ ॥ पिष्ट्वा लोहमयेभांडे स्थापयेत्तद्धूषितं निशि । अचिराद्धंति लेपोयमकालपलितं महत् ॥ ॥ ७० ॥इति श्रीशामदत्तविरचिते योगेश्वरे ऊर्ध्वांगादिचिकित्सानाम द्वादशः परिच्छेदः ॥ १२ ॥

## अथ बालरोगचिकित्सा ॥

प्राक्पंचवर्षात्कथितो हि बालः क्षीरप्रवृद्धोन्नविवर्धितश्च । एवं द्विवृद्धास्त्रिविधः स उक्तस्ताभ्यां भवेत्स्वाप्नमदुष्टितायां ॥ १ ॥ एकत्र-

तां याति जले प्रक्षिप्तं स्तन्यं तदा दोषविवर्जितं च । वातप्रदुष्टं प्लवते-ऽसुपित्तादुष्णं कफान्मज्जति दुष्टदुग्धं ॥ २॥ किराततुर्वीवृकिशुंठितिक्तागोपींद्रबीजाब्दसुरामृताभिः । कृतः कषायो विनिहंति दोषं दुग्धे स्थितं सेवितनारिभिश्च ॥ ३ ॥ पथ्यामधुयुता हंति बालानां कफतृड्ज्वरं । मधुनातिविषाश्वासच्छर्यतीसारकासजित् ॥ ४ ॥ त्रिवृद्रोरोचनं रेकाद्विबंधाध्मानकासजित् । तिक्ताहरीतकी तद्वत् बालानां ज्वरकासजित् ॥ ५ ॥ रोध्रेभकृष्णोशीराणां क्वाथोतीसारकासजित् । बालानां धातुकीबिल्वक्वाथो मधुयुतस्तथा ॥ ६ ॥ विषाणातिविषा कृष्णा शृंगी मधुयुतो हरेत् । शिशुच्छर्दी च मधुना कृष्णा कासं ज्वरं जयेत् ॥ ७ ॥ धातुकीजलबिल्वेभकृष्णारोध्रैः कृतः शृतः । बालानां मधुना हंति त्वतिसारं ज्वरं कफं ॥ ८ ॥ सिंहींद्रबीजमधुकयष्टीदार्वीभवः शृतः । शिशौ स्तन्यकृते दोषे ह्यतिसारे प्रशस्यते ॥ ॥ ९ ॥ जातिप्रवालपुष्पाणि पिष्ट्वा क्षौद्रेण योजयेत् । मुखपाकेंबु पिष्टं च गुदपाके रसांजनं ॥१०॥ आम्लवेतसविषाब्दधातुकी धान्यबिल्व हिमलोध्रदारुणं । शुंठिमोचरसवासकत्वचा प्रस्थमाढकजले शिवांजलिं ॥ ११ ॥ पाचयेच्च मृदुवन्हिना लयं प्रापिते ययसिताः शिवा शृताः । प्रक्षिपेच्च मधुप्रस्थमात्रके मासमात्रमुषिताः शवाः पिबेत् ॥ ॥ १२ ॥ सामधूहारितकी निवारयेत् तंदुलांबुसहिता प्रवाहिकां । श्वासकासमरुचिं ज्वरतृषां रक्तमामपवनातिसारजित् ॥ १३ ॥ इति मधुपक्वहरीतकी ॥ इति बालरोगचिकित्सा ॥

## अथ ग्रहरोगचिकित्सा ॥

मधुकुष्ठयुतो हंति षड्ग्रंथिस्वरसो मदं । सर्वग्रहसमुद्भूतं शंखिनीस्वरसस्तथा ॥१४॥ त्रिकटुत्रिफला कलिंगतिक्ता द्विनिशा पद्मकदारुपत्रचव्यं । अरुणातिविषाबला प्रियंगू गदसिद्धार्थवचा रसोन तुत्थं ॥ १५ ॥ वृषतार्क्ष्यशिलांबुयुग्मग्रंथियवजैलातगरोपलावृहत्यः । इभयष्टिमधूकसारमेषां रजसा मूत्रविपक्वसर्पिरेतत् ॥ १६ ॥ घृतमेतन्निहंत्याशु पानाभ्यंजननस्यतः । डाकिनीशाकिनीयक्षग्रहभूतोद्भवं गदं ॥ ॥ १७ ॥ वरा विशाला बृहतिप्रियंगू द्विसारिवा द्वीरजनी नतैलं । हिमारुणा कट्फलदंतिवेल्लं स्थिराद्वयं मालतिपुष्पपत्रं ॥ १८ ॥ उशीरदारूगददाडिमेभं तालीसपद्माव्हयमेतदेषां । कल्कशृतैः पक्वमिदं

हि सर्पिर्निहंति दोषं ग्रहभूतजातं ॥ १९ ॥ इति कल्याणवृतं ॥ मयूरपिच्छंबृहतीभदंतं निर्माल्यमांसी नखकेशशृंगं । वचाहिमोक्षोषणमक्षिकाविट् कार्पासबीजत्वग्हिंगुपिंडं ॥ २० ॥ कृतो धूपो निहत्येषां स्कंधोन्मादपिशाचजं । यक्षासुरग्रहावेशदेवरक्षोभवंगदम् ॥२१॥ मांसी कौंती शिलोशीरसटी स्पृक्का सिता गदं । नलाब्दरोचना चंडा रक्तेला पद्मकं निशा ॥ २२ ॥ तुल्यमेतच्चतुर्भागाः कुंकुमादष्टसर्षपात् । सर्वमेकत्र संचूर्ण्य वर्त्तिं कुर्याद्यवोन्मितां ॥ २३ ॥ वर्त्तिश्चंद्रोदयं हंति कृत्यालक्ष्मीपिशाचजं । ग्रहभूतसुरावेशं दोषमंजनतोध्रुवं ॥ २४ ॥

## अथ विषरोगचिकित्सा ॥

देवदालीफलरसो द्विविधं नाशयेद्विषं । कूष्मांडकरसो हंति गुडेन कोद्रजं विषं ॥ २५ ॥ पंचांगशिरीषजः क्वाथो निशाकल्कयुतो विषं । स्थावरं जंगमं हन्यात्तथा कोशातकी शृतः ॥ २६ ॥ गोमूत्रेण निशाकल्को द्विविधं नाशयेद्विषं । चातुर्जातस्य कल्पस्तु मधुना विषहा भवेत् ॥ २७ ॥ वंध्याकर्कोटिकामूलं पाटलाया जटास्तथा । घृतेन बिल्वमूलं वा द्विविधं नाशयेद्विषं ॥ २८ ॥ अंकोलमूलकल्कस्तु सक्षौद्रस्तंदुलांबुना । तथा जंबीरमूलस्य कल्कश्च विषहा भवेत् ॥ २९ ॥ पुष्पं कपित्थशिरिषधात्रीकाश्मरिसंभवं । पिष्ट्वा शीतोदकैः पीतं हरेत्सर्पभवं विषं ॥ ३० ॥ कोशातकीफलं कुष्ठं वचा रामठ्फलं तथा । चूर्णमेषां हरेत् धेनुमूत्रेण द्विविधं विषं ॥३१॥ वासात्वक्पुष्पद्विक्षुद्रागुडूच्यारग्वधत्वचां । चूर्णं गोमूत्रसंपीतं द्विविधं नाशयेद्विषं ॥ ३२ ॥ त्रिसप्तवारं स्वरसैर्भावितं मरिचान्वितं । शिरीषपुष्पं ससितं विषहन्यानतो जनात् ॥ ३३ ॥ दग्धं कपर्दतंदुलीयको भूतं रजो हरेत् । पिष्टं मयूरपित्तेन विषस्थावरजंगमं ॥ ३४ ॥ तिलानां तैलपललं गुडं चार्कपयः समं । अलर्कसंभवं हन्यात् विषं पानत द्वि भृशं ॥ ३५ ॥ जयपालभवां मज्जां भावयेन्निंबुकद्रवैः । एकविंशतिवारं च ततो वृत्तिं प्रकल्पयेत् ॥ ३६ ॥ मनुष्यलालया घृष्ट्वा ततो नेत्रं तयांजयेत् । सर्पदष्टविषं जित्वा संजीवयति मानवं ॥ ३७ ॥

## अथ सुवर्णमारणं ॥

कांचने गलिते नागं षोडशांशं विनिक्षिपेत् । चूर्णयित्वा तदम्लेन

घृष्ट्वा कृत्वा च गोलकं ॥ ३८ ॥ गोलकेन समं गंधं दत्वा चैवाधरोत्तरं । शरावसंपुटे धृत्वा पुटेद्विंशद्वनोत्पलैः ॥ ३९ ॥ एवं सप्तपुटैर्हेमभस्म हन्याद्विषामयान् । मधुतीक्ष्णयुतं वृष्यं त्रिदोषघ्नं रसायनं ॥ ॥ ४० ॥ इति हेममारणं ॥

## अथ शल्यचिकित्सा ॥

खड्गादिछिन्नगात्रस्य तत्कालं पूरितो व्रणः । गांगेरुकीमूलरसै र्जायते गतवेदनः ॥ ४१ ॥ लेपितं मधुना वस्त्रं व्रणस्योपरिबंधनात् । जलपक्वघृतभ्रष्टा निंबपत्राणि रोहयेत् ॥ ४२ ॥ यवतिलातसीशिग्रुफलमूलं च सर्षपाः । शणबीजलेपमेषां तक्रकांजिकसंयुतः ॥ ४३ ॥ आघातजं हरेच्छोथं निशालवणसंयुता । कुमारी हन्यते पक्ववरुणं पत्रबंधनात् ॥ ४४ ॥ घृतेन मधुना निंबपत्राणि बंधनाद्भवेत् । वर्णप्ररोहणं सर्पिर्यवसत्तोश्च बंधनात् ॥ ४५ ॥ वृषक्षुद्रामृतानिंबमुस्तापटोलपत्रजैः । क्वाथैरप्यापुरव्योषकल्कयुक्तं पचेत् घृतं ॥ ४६ ॥ घृतं तद्रोपणं लेपान्नाडिव्रणभगंदरे । गुग्गुलं तिक्तकाख्यं च गलगंडव्रणे क्षते ॥ ४७ ॥ इति श्रीशामदत्तविरचिते योगेश्वरे बालरोगादिचिकित्सानाम त्रयोदशः परिच्छेदः ॥ १३ ॥

Indira Gandhi National

## अथ जरारसायनम् ॥

श्वेतासर्पियुतं दुग्धं वलितं पलितं हरेत् । वृष्यं पुष्टिकरं मेध्यं पानतः कामदीपनं ॥ १ ॥ मधुकल्कोतिमधुनो लीढोनुदुग्धपानतः । बहुबीजकरो पुंसां जराविध्वंसको भवेत् ॥ २ ॥ वाजिगंधा पलं प्रातः घृतक्षौद्रयुतं लिहेत् । स्थविरोपि युवा मासं बहुवीर्यकरो भवेत् ॥ ३॥ तिलारुष्करभक्षेण सततं नाशयेद्वलिं । वृद्धत्वं पलितं दंताद्दढास्तेन भवंति च ॥ ४ ॥ स्वरसैर्भावितं धात्रीचूर्णं क्षौद्रघृतप्लुतं । भवेद् दुग्धानुपानेन जराव्याधिविनाशनं ॥ ५ ॥ फलत्रिकं सैंधवयष्टिकृष्णातुगारजः शर्करया प्रयुक्तं । वृष्यं भवेन्मेध्यतमं नराणां जरामयघ्नं वलितं निहंति ॥ ६ ॥ श्वदंष्ट्रामृतामलकैः सर्पिः क्षौद्रयुतं लिहेत् । जराव्याधिहरं चूर्णं वृष्यं पलितनाशनं ॥ ७ ॥ पलाशबीजामलकीतिलानां चूर्णं सितामाक्षिकसर्पियुक्तं । वृष्यं जराव्याधिविनाशनं च मेध्यं करं रात्रौ भवे प्रयुक्तं ॥ ८ ॥ स्वरसैर्भावितं चूर्णं

विदार्याः सपयोघृतं । सेवितं वार्द्धके वृष्यं तरुणे किमुदीर्यते ॥ ९ ॥ गोक्षुरं वानरीगुंजाफलोद्भूतं भवेद्रजः । सर्पिर्दुग्धयुतं वृष्यं वार्धके यौवने किमु ॥ १० ॥ शतावरीगोक्षुरकौ बीजं च कपिकच्छुजं । गांगेरुकी त्वतिबलाबीजं चेक्षुरसंभवं ॥ ११ ॥ चूर्णितं सर्वमेकत्र गोदुग्धेन पिबेन्निशि । न तृप्तिं यातिनारीभिर्नरः चूर्णप्रभावतः ॥१२॥ पिप्पलीनिस्तुषं माषशालितंदुलजं रजः । तदर्द्धंगोघृतेनैव भर्जयेच्च समं ततः ॥ १३ ॥ सर्वार्द्धशर्करा योज्या जलं च द्विगुणं क्षिपेत् । ततः शनैः शनैः पक्त्वा घृतात्कुर्वीत मोदकान् ॥ १४ ॥ भुक्त्वा सायं पलैकं च पिबेत्क्षीरं चतुर्गुणं । कृत्वैवं रमयेद्वह्वी नारीभिर्न क्षीयते नरः ॥१५॥ निस्तुषमाषकपिकच्छुफलश्वदंष्ट्रायष्टीमधुमुशली शरावयुग्मं । कंसद्वये पयसि मंदहुताशनेन गोसर्पिरंजलियुगं विनिक्षिप्यपाच्यं ॥ १६ ॥ तस्मिन् घने प्रस्थयुगं च शर्करां शीते मधुनः कुडवद्वयं पृथक् । कर्षप्रमाणान्यमूनि विनिक्षिपेत् लवंगजातीफलवंशलोचनं ॥ १७ ॥ तुगा चतुर्जातकव्योषकर्पुरं श्रेष्ठा वचा कल्कपत्री पद्मकं । पाको जराव्याधिहरोतिशुक्रदो बलप्रदो वीर्यविबंधनो भवेत् ॥ १८ ॥ इति कौंचपाकः । निंबफलास्थितैलं वा ज्योतिष्मतिफलोद्भवं । एरंडतैलमथवा पानतो हि रसायनं ॥ १९ ॥ अथ वृष्यचिकित्सा ॥ पुंस्त्वदोषास्तु पंचैव प्रोक्तास्तत्रेषकः स्मृतः । आसेक्यश्चैव कुंभीकः सुगंधिः षंढसंज्ञितः ॥ २० ॥ शुक्रदोषास्तथाष्टौ स्युर्वातात्पित्तात्कफेन च । कुणवं श्लेष्मवाताभ्यां पूयाभः श्लेष्मपित्ततः ॥ २१ ॥ क्षीणं च वातपित्ताभ्यां मं[illegible]श्च श्लेष्मरक्ततः । मलाभं सन्निपाताच्च शुक्रदोषा इतीरिताः ॥ २२ ॥ शतावरीनागबलाविदार्यामलकीफलैः । सगोक्षुरैः कृतं चूर्णं सूक्ष्मं क्षौद्रसितान्वितं ॥ २३ ॥ भुक्त्वा क्षीरानुपानाच्च षंढत्वं हरते ध्रुवं । बल्यं धातुकरं वृष्यमेकैकसंभवं तथा ॥ २४ ॥ बलातृतीयधत्तूरमधूकसंभवं रजः । मधुसर्पिसितायुक्तं भुक्तावीर्यं लभेत् ध्रुवं ॥ २५ ॥ उच्चटामधुकोद्भूतं चूर्णं क्षौद्रसितायुतं । लीढं दुग्धानुपानेन बलशुक्रकरं मतं ॥ २३ ॥ चूर्णं मुद्गं माषपर्णीछिन्नामलत्रिकंटकैः । कृतं सिताज्यक्षौद्रेण लीढं शुक्रविवर्द्धनं ॥ २७ ॥ जातीफलाकल्करशुंठिकृष्णा लवंगकंकोलहिमेभपुष्पं । कर्षं पृथक् फेनमहेश्च बिल्वमेकत्रसंकुटच लिहेन्मधूना ॥२८॥

माषैकं शुक्रजननं पुंसामानंदकारकं । नारीणां प्रीतिजननं सेवेत निशि कामुकः ॥ २९ ॥ स्वरसैर्भावितं धात्री कंसं कृष्णांजलिद्वयं । सिताप्रस्थं क्षिपेत्कंसे सर्पिषः क्षौद्रकंसके ॥ ३० ॥ स्निग्धभांडे क्षिपेत्सर्वं स्थापयेत् धान्यपुंजके । वर्षांते तत्समुधृत्य भक्षयेत्पलमात्रकं ॥ ३१ ॥ तेन बुद्धिबलस्थैर्यं वलीपलितनाशनं । रूपवर्णस्मृतिः सत्वं भवत्येव न संशयः ॥ ३२ ॥ त्रिफला मधुकं कुष्ठं द्वेनिशे कटुरोहिणी । विडंगं पिप्पली मुस्तं विशाला कट्फलंवचा ॥ ३३ ॥ द्वे मेदे द्वे च काकोल्यौ सारिवे द्वे प्रियंगुका । शतपुष्पा हिंगुरास्ना चंदनं रक्तचंदनं ॥ ३४ ॥ जातिपुष्पं तुगाक्षीरि कमलं शर्करा तथा। अजमोदा च दंती च कल्कैरेतैश्च कार्षिकैः ॥ ३५ ॥ जीववत्सैकवर्णानां घृतप्रस्थगवां पचेत् । चतुर्गुणेन पयसा पचेदारण्यगोमयैः ॥ ३६ ॥ एतत्सर्पिर्नरः पीत्वा स्त्रीषु नित्यं वृषायते । पुत्रानुत्पादयेद्वीरान् वंध्यापि लभते सुतं ॥ ३७ ॥ इति फलघृतं ॥ स्नुहिक्षीरेण संपिष्टं समं सुवर्णमाक्षिकं । लेपयेत्तारपत्राणि तेन रुंध्वा मुषा पुटे ॥ ३८ ॥ त्रिंशद्वनोत्पलैर्दग्ध्वा समुधृत्य पुनः पचेत् । एवं दशपुटैस्तारं निरुत्थं भस्म जायते ॥ ३९ ॥ द्विगुंजं पर्णखंडेन भक्षितं शुक्रदं परं । बलपुष्टिकरं मेध्यं वलीपलितनाशनं ॥ ४० ॥ वज्रं तारं सुवर्णं च ताम्रसूतकगंधकं । लोहं क्रमविवृद्धयानि कुर्यादेतानि मात्रया ॥ ४१ ॥ विमर्द्य कन्यकाद्रावैर्न्यसेत्काचमये घटे । विमुद्य पिठरीमध्ये धारयेत्सैंधवैर्भृते ॥ ४२ ॥ वन्हिं शनैः शनैः कुर्याद्दिनैकं तत उद्धरेत् । स्वांगशीतं च संचूर्ण्य भावयेदर्कदुग्धकैः ॥ ४३ ॥ अश्वगंधा च काकोली वानरी मुशली क्षुरः । त्रिवेलं स्वरसैरासां शतावर्याश्च भावयेत् ॥ ४४ ॥ पद्मकंदकसेरूणां रसैः काशस्य भावयेत् । कस्तूरीव्योषकर्पूरकंकोलैलालवंगकैः ॥ ४५ ॥ पूर्वचूर्णादष्टमांशमेतचूर्णंविमिश्रयेत् । सर्वैः समाशर्करां च दत्वा शाणोन्मितं पिबेत् ॥ ४६ ॥ गोदुग्धे द्विपलेनैव तेन तेजोबलं भवेत् । तरुणी रमयेत् बव्हीर्नच हानिः प्रजायते ॥ ४७ ॥ इति मदनकामदेवो रसः ॥

## अथ गंधकादीनां शोधनं ॥

अथ गंधकशुद्धिः ॥ लोहपात्रे विनिक्षिप्य घृतमग्नौ प्रतापयेत् । तप्ते घृते तत्समानं क्षिपेद्गंधकजं रजः ॥ ४८ ॥ विद्रुतं गंधकं ज्ञात्वा

दुग्धमध्ये विनिक्षिपेत् । एवं गंधकशुद्धिः स्यात्सर्वकार्येषु योजयेत् ॥ ४९ ॥

## अथ स्वर्णमाक्षिकशोधनं ॥

माक्षिकस्य त्रयो भागा भागैकः सैंधवस्य च । मातुलिंगद्रवैर्वाथ जंबीरोत्थद्रवैः पचेत् ॥ ५० ॥ चालयेल्लोहजे पात्रे यावत्पात्रं सुलोहितं । भवेत्ततस्तु संशुद्धिं स्वर्णमाक्षिकमृच्छति ॥ ५१ ॥ कुलित्थस्य कषायेण घृष्टा तैलेन वा पुटेत् । तक्रेण वाजमूत्रेण म्रियते स्वर्णमाक्षिकः ॥ ५२ ॥

## अथ तारमाक्षिकशोधनं ॥

कर्कोटीमेषश्रृंग्युत्थैर्द्रवैर्जंबीरजैर्दिनं ॥ भावयेदातपे तीव्रे विमला शुध्यति ध्रुवं ॥ ५३ ॥

## अथ तुत्थशोधनं ॥

कपोतमार्जारविषिदशांशकं टंकणं युतं तुत्थमवाप्य मर्दी । मृद्वग्निना पाच्यपुटेथ दध्ना क्षौद्रैस्ततः शुध्यति तुत्थमेव ॥ ५३ ॥

## अथ नीलांजनशोधनं ॥

नीलांजलं चूर्णयित्वा जंबीरद्रवभावितं । दिनैकमातपे शुद्धं भवेत्कार्येषु योजयेत् ॥५५॥ एवं गैरिककासीस टंकणानि वराटिका । शंखस्तुवरिकं कुष्ठं शुद्धिमायाति निश्चितं ॥ ५८ ॥

## अथ मनःशिलाशुद्धिः ॥

पचेत्त्र्यहमजामूत्रे दोलायंत्रे मनःशिला । भावयेत्सप्तधा पित्तैरजाज्याः शुद्धिमृच्छंति ॥ ५७ ॥

## अथ तालकशुद्धिः ॥

तालकः कणशः कृत्वा संचूर्णं कांजिके क्षिपेत् । दोलायंत्रेग यामैकं ततः कूष्मांडजैर्द्रवैः ॥ ५८ ॥ तिलतैले पचेद्यामं यामं च त्रिफलाजलैः । एवं यंत्रे चतुर्यामं पाच्यं शुध्यति तालकं ॥ ५९ ॥

## अथ रसकशुद्धिः ॥

नरमूत्रैः सगोमूत्रैः सप्ताहं रसकं पचेत् । दोलायंत्रेण शुद्धिःस्यात्ततः कार्येषु योजयेत् ॥ ६० ॥

## अथ शिलाजतुशोधनं ॥

गोदुग्धैस्त्रिफलाक्राथैर्भृंगद्रावैः शिलाजतु । मर्दयेद्दिनमेकैकं शुष्कां च शुद्धतां व्रजेत् ॥ ६१ ॥

## अथ दरदशुद्धि ॥

मेषीक्षीरेण दरदमम्लवर्गैश्च भावयेत् । सप्तवारं प्रयत्नेन शुद्धिमायाति हिंगुलः ॥ ६ ॥

## अथ क्षारकल्पना ॥

क्षारवृक्षस्य काष्ठानि शुष्कान्यग्नौ प्रदीपयेत् । नीत्वा तद्भस्म मृत्पात्रे क्षिप्त्वा नीरे चतुर्गुणे ॥ ६३ ॥ विमर्द्य धारयेद्रात्रौ प्रातरच्छं जलं नयेत् । तन्नीरं क्वाथयेद्वन्हौ यावत्सर्वं विशुध्यति ॥ ६४ ॥ ततः पात्रात्समुल्लिख्य क्षारो ग्राह्यः सितप्रभः । चूर्णाभः प्रतिसार्यः स्यात्पानीयः क्राथवस्थितः ॥ ६५ ॥ इतिक्षारद्वयं धीमानुक्तकार्येषु योजयेत् । इति श्रीशामदत्तविरचिते योगेश्वरे जरारसायनादिकथनं चतुर्दशः परिच्छेदः ॥ १४॥

Indira Gandhi National Centre for the Arts

## अथ तक्रविधिः ॥

मासे श्रेष्ठे शुभ्रपक्षे हिमांशोर्वीर्यं दृष्ट्वा सुदिनं संप्रपूज्य । शिवं पुष्पैर्वृद्धवैद्योपदेशात्तक्रारंभः क्रीयते रोगिभिश्च ॥ १ ॥ धेनुं श्वेतां देगिनीं वत्सयुक्तां रक्तैर्वस्त्रैः शोभितां सुष्ठुरूपां । दुग्धे नूनां यौवनोद्भूतरूपां शुष्काहारां स्वच्छनीरावसक्तां ॥ २ ॥ धूपैर्दीपैर्गंधमाल्यादिभिश्च पूज्या गुर्वैद्यविद्योपदेशात् । नि-ीतक्ष्मास्वच्छसंस्थानसंस्थां कुर्यात्तक्रं स्तुतिभिः स्तुत्यरोगी ॥ ३ ॥ निशाजमोदात्रिफलाशताव्हसिंधुत्थव्योषद्विपलं च चूर्णं । प्रदेयमन्नैः पवनामयघ्नैर्धन्वै सदारोगिनिरामयत्वे ॥ ४ ॥ कपित्थसिंधुत्थशिवाग्निशुंठी समूलकृष्णाविहितं च चूर्णं । निंबूरसैः किंशुमधुसृतैश्च लिप्तातनौ स्नानमथामयी चरेत् ॥ ५ ॥ सुवर्णमुक्तारमये सुपात्रे पीनस्तनी यौवनमत्तवेषा । चकोरनेत्रायुवती प्रकुर्याच्छनैः शनैर्दोहनकं च धेनोः ॥ ६ ॥ दिने परे तद्दधि मृन्मये सा निक्षिप्य नीरं त्रिगुणं वरेण । विलोडयेद्दंशमयेन सम्यगनारतं शुचिभवेच्च तक्रं ॥ ७ ॥ त्रिजातसिंधुत्थकपित्थचूर्णं क्षिप्त्वा पिबेत्तन्नवनीतवर्ज्जं । विरेचनं पूर्वमिदं सक्षौद्रं लिहेदनुकुंकुमशुंठिचूर्णं ॥ ८ ॥

भक्ष्ये ततस्तांबुलमश्नुयात्स समुद्गभक्तं दिवसे न रात्रौ । स्थितो निवातेऽग्निसमीरसंस्था नारायणस्नेहनस्निग्धदेहः ॥ ९ ॥ विरेचनाच्छुद्धिमथो विचिंत्य सिंधुत्थशुंठीजरणोद्भवं च । क्षिप्त्वा रजः शस्तमिदं हि तक्रं पाने यथावद्विधिना चरेद्वै ॥ १० ॥ कपर्दिमृत्तारसुवर्णपात्रे शरावतो वृद्धि पिबेच्च तक्रं ॥ अन्नं परीधीय शनैर्दिवाथ यथारुचिः शस्तमिदं मुहुश्च ॥ ११ ॥ वर्षं ततोर्धं च ततोर्द्धमासादर्धं विलोक्यामयमुक्तिहेतुः ॥ तक्रं प्रकुर्याद्भजनं हरेश्च जलं च पानं नहि शस्तमत्र ॥ १२ ॥ दिवाशयं जागरणं च रात्रौ प्रकोपवादं बहुमूल्यवस्त्रं । स्नानं च भूसंशयनं व्यवायं त्यजेदमूनि कृततक्रचित्तः ॥ १३ ॥ कस्तूरिकाकेसरचंदनानां नखागरुकर्पूरसंयुतानां । लेपो हितः प्रत्यहमप्ययोग्याः स....समीपे हि यवांकुराश्च ॥१४॥ तक्रं हरेद्वातबलासकासच्छर्द्यूदरश्वासविषं वलित्वं । गुल्मातिसारग्रहणीभगंदरं प्लीहाग्निमांद्यप्रदरं क्षयं च ॥ १५ ॥ पांडुश्मरीजीर्णमलज्वरत्वं बलादचतामूत्रबहुत्वमेहं । बलप्रदं वीर्यकरं सुधीदं गोतक्रसेवी ह्यमरो भवेच्च ॥१६॥ प्रावृट्शरद्ग्रीष्मवसंतकेषु कृशे भ्रमे पित्तक्षताग्निरोगे । मूर्छायुते मध्यदिनेवलग्नौ (?) तक्रं न देयं विदुषा कदाचित्॥ १७ ॥ कषायमिष्टाम्लरसाभियुक्तं सुसेवनात् तक्रमथो विलोक्य । रोगावमुक्तं विमलेंद्रियत्वं यूषं प्रदद्याच्छुभमुद्गजातं ॥ १८ ॥ त्यजेच्च तक्रं लघ्वन्नमाश्रयेत् शनैः शनैर्वा विपचेच्च यावत् । गुर्वन्नमायासमथो हि तावत्यज्येत्समस्तान् विषयांश्च मांसं॥१९॥ ततः सवासां सुरभीं प्रदद्यात्सहेमवस्त्राभियुतां च रोगी । वैद्याय दानानि बहुविधानीतरेभ्य देयानि च भोजनानि ॥ २० ॥ इति श्रीशामदत्तविरचिते योगेश्वरे तक्रविधिनाम-पंचदशः परिच्छेदः ॥ १५ ॥

## अथ दंभप्रतीकारः ॥

यच्चरकादिषु ग्रंथेषु विधिना प्रोचितं च तत् । दंभानां कर्मसंक्षेपादस्मिन् ग्रंथे मयोच्यते ॥ १ ॥ प्लीहे ग्रहण्यां क्षयगुल्मकासे श्वासेतिसारे ज्वरसन्निपाते । उन्मादवाते कटिशीतवाते शोफोदरे वर्घ्मनि विद्रधीषु ॥ २ ॥ जलोदरे हृद्रदपांडुशूलेपस्मारवाते हनुकंपवाते । इत्यादिरोगेषु यथाप्रदेशं विचार्य कार्यं विधिनाग्निकर्म्म ॥ ३ ॥ शस्त्रं च ज्ञेयं त्रिविधं भिषग्भिः कांस्यं च हैमोद्भवमायसं च । अतो यथा-

योग्यमवेक्ष्य शस्त्रं गदांस्तथा कुर्वित वन्हिकर्म ॥ ४ ॥ अस्थिदग्घे क्षये कासे श्वासे घोरगदे तथा । रुधिरे लोहशस्त्रेण दह्यते रोगिणं भिषक् ॥ ५ ॥ प्लीहावबाहुगुल्मेषु शीतापस्मारमूर्च्छने । उदरे मांससंयुक्ते दह्ये कांस्यमयेन च ॥ ६ ॥ अंत्रवृद्धौ च बालेषु जिव्हातालुगलामये । विषामयेषु हैमेन शस्त्रेण विदहेद्भिषक् ॥ ७ ॥ चत्वारः कीर्तिता दंभाः सन्निपाते ज्वरे तु ये । शंखयोर्जतुदेशे तु ब्रह्मांडे विदहेद्भिषक् ॥ ८ ॥ वर्तुलौ शंखदंभौ च भ्रुवंत्यक्त्वार्द्धमंगुलं । प्रोक्तो लंबो जतूदेशे प्रापयेच्च शिराद्वयं ॥ ९ ॥ प्रादेशमात्रमारभ्य नासिकाग्राच्च वर्तुलः । ब्रह्मांडे मुनिभिः प्रोक्तं एवं सर्वत्र कारयेत् ॥ १० ॥ ग्रहण्यामतिसारे च दंभाः पंच प्रकीर्तिताः । चत्वारः कूर्मपादाग्रमालक्ष्य वर्तुला स्मृताः ॥ ११ ॥ नाभेरधः प्रलंबश्च चतुरंगुलसंक्षयः । अंगुलं पंचमः प्रोक्तो नाभिमूलं भिषग्वरैः ॥ १२ ॥ कृत्वा हस्तगतं प्लीहं प्लीहे दंभद्वयं भजं । एकैकस्योपरिष्टाच्च दंभो देयो विचक्षणैः ॥ १३ ॥ विद्रधौ वर्तुलः पश्चात् हृन्मूले वर्तुलस्तथा । चतुरंगुललंबं च परिदंभत्रयं मतं ॥ १४ ॥ त्यक्त्वा हृन्मूलजो दंभो देयस्त्र्यंगुलमात्रया । दारुणा यत्र पीडा स्यात्पश्चात्तत्र प्रदीयते ॥ १५ ॥ जलोदरे पांडुरोगे तथा शोफोदरे मतः । दंभाश्चत्वार हृन्मूले नाभौ कुक्षिद्वये तथा ॥ १६ ॥ हृन्मूले वर्तुलो नाभौ वर्तुलो वलयाकृतिः । त्यक्त्वांगुष्ठमितां नाभिं देयो कुक्ष्यौ च लंबकौ ॥ १७ ॥ गुल्मे शूले चोदरस्थे प्लीहेन सदृशा मताः । अन्यत्र शूलसंभूते दंभः शूलोपरि मताः ॥ १८ ॥ क्षयो संपूर्णसंजाते दंभा द्वादशसंमताः । हृदयेषु जतूदेशे ब्रह्मांडे चोदरे तथा ॥ १९ ॥ उक्ता ग्रहण्यां ये पंच ते दंभा उदरे मताः । कीर्तिता ये क्षये पंच ते देया हृदये तथा ॥ २० ॥ कासे श्वासे च ते दंभा हृद्रोगे ये स्मृतं बुधैः । हृद्रोगे लंबकस्त्वेकश्चत्वारो वर्तुला मताः ॥ २१ ॥ एकः स्ववार्त्तिवं (?) दंभो देयः शिरसि वर्तुलः । कर्णाद्रूर्ध्वं स शिरसि देयः षंचांगुलं बुधैः ॥ २२ ॥ शिरोरोगे तु चत्वारः सन्निपाते च ये मताः । त एव शैत्यरोगे च दंभाश्चत्वारसंमताः ॥ २३ ॥ दंभा उन्मादवाते षट् जतुदेशे च शंखयोः । ब्रह्मांडे पादयुग्मे च षडेवं परिकीर्तिताः ॥ २४ ॥ दंभद्वयं मणौ देयं कटिवाते भिषग्वरैः । एकः कुरंटरोगे च पादांगुल्याः समीपतः ॥ २५ ॥ कुरंटो वामभागे चेत् तदा देयश्च दक्षिणे ।

कुरंटो दक्षिणे भागे दंभो वामे तदा मतः ॥ २६ ॥ द्विपार्श्वयोः कुरंटश्चेत् द्विपादांगुलिषु तदा । दंभा दश बुधैः प्रोक्ताः कुरंटनाशना मताः ॥ २७ ॥ अपस्मारयुते देया उन्मादे ये मता बुधैः । त एवं षट् धनुर्वाते दंभा देया मनीषिभिः ॥ २८ ॥ द्वौ दंभौ नेत्ररोगे च शंखयोः परिकीर्तितौ । यत्र वर्ण भवंति (?) च तत्र वर्णोपरीमताः ॥ संध्यस्थित्वङ्मांसशिराशैःस्नायुगदावपातार्बुदचर्म्मकीले । भगंदरे श्लीपदचर्मकीले? त्वन्यत्र घातादिगदे विसर्पे ॥३०॥ एतेषु चैव रोगेषु यत्र पीडातिदारुणा । तत्रैव दह्यते सम्यक् शास्त्रं दृष्ट्वा विचक्षणैः ॥ ३१ ॥ पित्तप्रवृत्तौ तरुणेतिवृद्धे रक्तांतभिन्नोदरदुर्बलेषु । कामातुरे पित्तविकारवत्सु क्षुधातुरेमूत्रित.विड्वलेषु ॥ ३२ ॥ ग्रीष्मेतिरुद्धे सुकुमारकेषु गर्भान्वितासु शरदि क्रमेषु । अनूपदेशे त्वथ जांगले च नैतेषु दंभा भिषजैः प्रदेयाः ॥ ३३ ॥ यदेषां दीयते दंभो मृत्युतुल्यो भवेत्तदा । अथवान्यत्रदेशेषु बालवृद्धेषु दंभयेत् ॥ ३४ ॥ वातरोगेषु सर्वेषु सम्यग् दग्धं यथा भवेत् । तथैव ताम्रशस्त्रेण दह्यते कुशलो भिषक् ॥ ३५ ॥ दृष्ट्वा कालवयोबल्यं जानात्युष्णं यथामदी । तथैव त्वभिदग्धं स्यादेवं सर्वत्र कारयेत् ॥ ३६॥ कंठास्यकर्णाक्षिकपालमूत्रभ्रूगुह्यतालुगुदशंखमूले । एतेषु मर्म्मेषु किमप्यदह्यादंगुष्ठमूलेषु तथैव वैद्यः॥ ३७ ॥ मर्म्मेषु चणकार्द्धेन तुल्यं स्वल्पं भिषग्वरः । यथायोग्येन शस्त्रेण यथास्थाने दहेत्तथा ॥ ३८ ॥ ऊर्ध्वे गुल्फं जानुजंघाकटीहृत्पृष्ठिक्रोडंबाहुककोंटिकें च । एषु स्नायुसंधिसंस्थानकेषु तीव्रं पादा दह्यते योग्यशस्त्रैः ॥ ३९ ॥ धनुषाकारशस्त्रेण लोहेन वक्रदंभके । वक्रो दंभः प्रदेयो हि विचार्य स्थानदोषकौ ॥ ४०॥ त्वङ्मांससंस्थिते दंभे पिपासाशोफहृद्रदः । तृष्णाश्चोपद्रवा एते जायंते दंभकर्मसु ॥ ११ ॥ इत्येवमग्निकर्म्मस्मिन् किंचिदत्रोदितं मया । विस्तारं दर्शयेत्तस्य त्वन्यस्मिन् योगसंग्रहे ॥४२॥ इति श्रीशामदत्तविरचिते योगेश्वरे दंभप्रतीकारोनाम षोडशः परिच्छेदः ॥ १६ ॥

यद्द्रव्यं चिरकालस्थं द्रव्येषु संधितं भवेत् । तत्प्रोच्यते मया भेदैरासवोरिष्टयोरिह ॥ १ ॥

## अथ आसवारिष्टक्रिया ।

अपक्वौषधसंक्षिप्तमासवः सिद्ध उच्यते।यदौषधकाथसिद्धः सोरिष्टः

कथितं बुधैः ॥२॥ अनुक्तमानारिष्टेषु द्रवद्रोणे गुडात्तुलां । क्षौद्रं क्षिपेत् गुडादर्धं प्रक्षेपं दशमांशकं ॥ ३ ॥ घृतभांडे विनिक्षिप्य कल्कं क्वाथं गुडं मधु । तद्भांडं पृथिवीगर्त्ते धृत्वा चाग्निसमीपतः ॥ ४ ॥ मासादूर्ध्वं ततो जातं रसं वस्त्रेनगालितं॥पलमात्रं पिबेन्नीत्वा त्वेवं सर्वत्र कारयेत्५

## अथ सुराक्रिया।

संधानं जलद्रव्याणां कृत्वा मंत्रेण गालयेत् । तदुत्पन्ना सुरा प्रोक्ता तद्भेदा बहवो मताः ॥ ६ ॥

## अथ सूक्तं।

कंदमूलफलादीनि सस्नेहलवणानि च । यत्र द्रव्येभिपूर्यते तत्सूक्तमभिधीयते ॥ ७ ॥

## अथ चुक्रः।

चिरस्थमम्लतां यातं क्वाथं वा मधुरद्रवः ॥ विनष्टसंधितो यस्तु तच्चुक्रमभिधीयते ॥ ८ ॥

## अथ गुडसूक्तं।

गुडांबुना सतैलेन कंदशाकफलैस्तथा ॥ संधितं चाम्लतां यातं गुडसूक्तं प्रचक्षते ॥ ९ ॥ इत्यनेन प्रकारेण चेक्षुसूक्तं विधीयते । मृद्वीकासंभवं सूक्तमेवं स्याद्भिषजोदितं ॥ १० ॥

## अथ सौवीरं।

तुषांबुसंधितं ज्ञेयमामैर्विदलितैर्यवैः।यवैस्तु निस्तुषैः पक्वैः सौवीरं संधितं भवेत् ॥ ११ ॥

## अथ कांजिककल्पना।

कुलत्थमाषधान्यैश्च समंडैः संधितं भवेत् । तदेव कांजिकं ज्ञेयमुक्तकार्येषु योजयेत् ॥ १२ ॥

## अथ सूक्तचुक्रं।

यन्मृत्स्नादिशुचौ भांडे सगुडक्षौद्रकांजिकं । धान्यराशौ त्रिरात्रस्थं सूक्तचुक्रं तदुच्यते ॥ १३ ॥

## अथसुतं।

कंदमूलफलाढ्यं च लवणोदकमिश्रितं । संधानाच्चिरकालाम्लमासुतं परिकीर्तितं ॥ १४ ॥

## ~ अथ मधुसूक्तविधानं ।

जंबीराणां फलरसः प्रस्थैकः कुडवोन्मितं । माक्षिकं तत्र दातव्यं पलैका पिप्पली मता ॥ १५ ॥ एतदेकीकृतं सर्वं मधुभांडे निधापयेत् । धान्यराशौ स्थितं मासं मधुसूक्तमुदाहृतं ॥ १६ ॥ अर्कोद्भवनिमित्तं यद्द्रव्यं द्विगुणकं च तत् । शुचौ भांडे विनिक्षिप्य त्रिचतुःपंचरात्रकं ॥ १७ ॥ उषितं तत् दृढे भांडे यंत्रयोग्ये पुनः क्षिपेत् । क्षिपेत्तत्कुक्षिरंध्रे च दर्व्याकारानलीं शुभां ॥१८॥ मुक्त्वा तदुपरि पात्रं धातुजे मध्यगर्तकं । शिरस्त्रोपसमाकारं शीतोदकसमन्वितं ॥ १९ ॥ तद्विमुद्रच दृढं वैद्यः स्वांगशीतं प्रकारयेत् । चुल्ल्यां यंत्रं निवेश्याधः कुर्यादग्निं क्रमात्ततः ॥ २० ॥ मुक्त्वा नलीमुखे पात्रं काचजं तत्रगं द्रवं । काचभांडे विनिक्षिप्य तदर्कं योजयेद्भिषक् ॥ २१ ॥ विलोक्य शास्त्रं परिकीर्तिते मया धियोनुसारेण चिकित्सकैर्बुधैः । योगेश्वरेस्मिन् विशदाकृपाकैर्बुद्धिर्विधेया यदि शुद्धचशुद्धिगे ॥ २२ ॥ हराक्षिवस्वब्धिहिमांशुगेब्दे(१४८३)फाल्गूनमासे कुसुमागमे च।कृष्णे च पक्षे शशिना दशम्यां विलेखितो ग्रंथ मया परोयं ॥ २३॥ इति श्रीशामदत्तविरचिते योगेश्वरे आसवादिक्रियाकथनं नाम सप्तदशपरिच्छेदः ॥ १७ ॥

---

## समाप्तं.

IGNCA RAR
ACC. No. R-347
615.536
SHR

## उपसंहारः ।

शामदत्तनामकेनायं ग्रंथः कृतः । शामदत्तस्य कालः वा तस्य विशेषं वृत्तं लोके न ज्ञायते ।—

"कृष्णदत्तात्मजो वैद्यः पुरे सौजन्यसंज्ञके । अल्पबुद्ध्यनुसारेण वक्ष्ये रोगहरं परम् ॥"

एवं मंगले वदति ग्रंथकारः । सौजन्यनामकं नगरं अधुना कुत्रचिन्न दृश्यते । 'सुजानपुरा' नामकं ग्राममस्ति तदेव तत्सौजन्यनामकं पुरं अनुमानेन ज्ञायते । द्वितीयमनुमानं एतद्विषये ग्रंथकर्त्रा कृतं काव्यमुत्पादयति । अस्य ग्रंथे काव्यदोषाः सन्ति स्थले स्थले, तस्मात् वाग्भटानंतरं भाषाविषयकाध्ययने वैद्यानां अनुपचितसौहार्दं अनुमीयते । तेनैव अस्मिन् ग्रंथे काव्यदोषाः स्थिरीकृताः सन्ति बहव्यः । एतथरूपांतरभीत्या तद्विशेषशुद्धीकरणं न कृतं अस्माभिः । व्यवहारसिद्धिः स्यात्तथा ग्रंथशुद्धिश्चेत्तर्हि अलमिति विचारः वैद्यकादिप्रत्यक्षव्यवहार्यशास्त्रप्रचारकेषु सुस्थिरः संदृश्यते । तेनैव "नटभटगणकचिकित्सकवैतालिकानां मुखगव्हरे अपशब्दमृगाःस्यु" रिति वैय्याकरणानां सिद्धान्तः प्रचलितः । अस्तु तावत् ।

अस्य ग्रंथस्य रचनाकालः ग्रंथकर्त्रा एव ग्रंथान्ते एवं लिखितमस्ति "हराक्षिवस्वब्धिहिमांशुगेब्दे (१४८३) फाल्गूनमासे कुसुमागमे च । कृष्णे च पक्षे शशिना दशम्यां विलेखितो ग्रंथ मया परोयम् ॥"

उपरितनवत्सरः शालिवाहनस्य वा विक्रमस्य, एवं शंका नैसर्गिकी स्यात् । परं तु सामान्यव्यवहाररीत्या अस्य वत्सरस्य 'विक्रमसंवत्' इति विधानं समीचीनं भवत्येवं तर्कोस्ति । शामदत्तस्तथा सुजानपुरा इति नामानुसारेण हि आर्यावर्त्तोत्तरप्रदेशे ग्रंथकारस्य निवास स्तर्क्यार्होस्ति । परं च तत्प्रदेशे विक्रमसंवत् अधुनापि विशेषरीत्या प्रचलति । तस्मात् अयं वत्सरः विक्रमसंवत् १४८३ एवमेव ज्ञातव्य इत्यस्मत्तर्कः सुतर्कवत्स्यादित्यलम् ।

KALANIDHI
Rare Book Collection
ACC No.:
IGNCA Date: